# १ संस्कृतम् (सङ्ख्या )

Numbers = सङ्ख्या / सङ्ख्या

- संस्कृतभाषा में संख्या, विशेषण के रूप में प्रयुक्त है ।
- अतः जो लिंग, विभक्ति तथा वचन विशेष्य के होते है वहीं लिंग, वचन और विभक्ति विशेषण के भी होते है ।

यल्लिङ्गं यद्वचनं या च विभक्तिः विशेष्यस्य ।
तद् लिङ्गं तद्वचनं सा च विभक्तिः विशेषणस्यापि ॥

- एक से चार तक तीनों लिंगो में अलग अलग रूपरचना है परंतु पांच से तीनों लिंगो में समान रूपरचना है

- अङ्कानां वामतो गतिः । (दशांशपद्धतिः)

| | | | |
|---|---|---|---|
| द्विचत्वारिंशत् | ४२ | = २+४० | द्वि + चत्वारिंशत् |
| पञ्चविंशतिः | २५ | = ५+२० | पञ्च + विंशतिः |
| नवनवतिः | ९९ | = ९+९० | नव + नवतिः |

| एकः | एका | एकम् | द्वौ | द्वे | द्वे |
|---|---|---|---|---|---|
| बालः | बाला | नेत्रम् | बालौ | बाले | नेत्रे |
| हस्तः | महिला | कार्यम् | हस्तौ | महिले | कार्ये |
| विद्यालयः | देवी | उदरम् | विद्यालयौ | देव्यौ | उदरे |
| शिक्षकः | मापिका | पुस्तकम् | शिक्षकौ | मापिके | पुस्तके |
| कविः | अङ्कनी | गृहम् | कवी | अङ्कन्यौ | गृहे |
| साधुः | माता | मुखम् | साधू | मातरौ | मुखे |
| नेता | भगिनी | यानम् | नेतारौ | भगिन्यौ | याने |

| त्रयः | तिस्रः | त्रीणि | चत्वारः | चतस्रः | चत्वारि |
|---|---|---|---|---|---|
| बालकाः | बालाः | नेत्राणि | बालकाः | बालाः | नेत्राणि |
| हस्ताः | महिलाः | कार्याणि | हस्ताः | महिलाः | कार्याणि |
| विद्यालयाः | देव्यः | उदराणि | विद्यालयाः | देव्यः | उदराणि |
| शिक्षकाः | मापिकाः | पुस्तकानि | शिक्षकाः | मापिकाः | पुस्तकानि |
| कवयः | अङ्कन्यः | गृहाणि | कवयः | अङ्कन्यः | गृहाणि |
| साधवः | मातरः | मुखानि | साधवः | मातरः | मुखानि |
| नेतारः | भगिन्यः | यानानि | नेतारः | भगिन्यः | यानानि |

<u>९ संस्कृतम् (सङ्ख्या )</u>

| पञ्च | पञ्च | पञ्च |
|---|---|---|
| बालकाः | बालाः | नेत्राणि |
| हस्ताः | महिलाः | कार्याणि |
| विद्यालयाः | देव्यः | उदराणि |
| शिक्षकाः | मापिकाः | पुस्तकानि |
| कवयः | अङ्कन्यः | गृहाणि |
| साधवः | मातरः | मुखानि |
| नेतारः | भगिन्यः | यानानि |

| | | | | |
|---|---|---|---|---|
| १ - एकम् | ११ - एकादश | २१ - एकविंशतिः | ३१ - एकत्रिंशत् | ४१ - एकचत्वारिंशत् |
| २ - द्वे | १२ - द्वादश | २२ - द्वाविंशतिः | ३२ - द्वात्रिंशत् | ४२ - द्विचत्वारिंशत् |
| ३ - त्रीणि | १३ - त्रयोदश | २३ - त्रयोविंशतिः | ३३ - त्रयस्त्रिंशत् | ४३ - त्रिचत्वारिंशत् |
| ४ - चत्वारि | १४ - चतुर्दश | २४ - चतुर्विंशतिः | ३४ - चतुस्त्रिंशत् | ४४ - चतुश्चत्वारिंशत् |
| ५ - पञ्च | १५ - पञ्चदश | २५ - पञ्चविंशतिः | ३५ - पञ्चत्रिंशत् | ४५ - पञ्चचत्वारिंशत् |
| ६ - षट् | १६ - षोडश | २६ - षड्विंशतिः | ३६ - षट्त्रिंशत् | ४६ - षट्चत्वारिंशत् |
| ७ - सप्त | १७ - सप्तदश | २७ - सप्तविंशतिः | ३७ - सप्तत्रिंशत् | ४७ - सप्तचत्वारिंशत् |
| ८ - अष्ट | १८ - अष्टादश | २८ - अष्टाविंशतिः | ३८ - अष्टत्रिंशत् | ४८ - अष्टचत्वारिंशत् |
| ९ - नव | १९ - नवदश | २९ - नवविंशतिः | ३९ - नवत्रिंशत् | ४९ - नवचत्वारिंशत् |
| १० - दश | २० - विंशतिः | ३० - त्रिंशत् | ४० - चत्वारिंशत् | ५० - पञ्चाशत् |

१. मम समीपे _______ (५) लेखन्यः सन्ति ।

२. शिवस्य _______ (३) नेत्राणि सन्ति ।

३. कक्षायां _______ (३५) छात्राः पठन्ति।

४. गृहोद्याने _______ (१५) पुष्पवृक्षाः सन्ति ।

५. मार्गे _______ (३) महिलाः गच्छन्ति ।

६. दशरथस्य _______ (४) पुत्राः आसन् ।

७. मम पितुः _______ (२) भ्रातरौ _______ (१) भगिनी च सन्ति ।

८. मञ्चे _______ (३) कवयः काव्यानि पठन्ति ।

**९ संस्कृतम् (सङ्ख्या )**

९. _______ (४) गुरवः वार्तालापं कुर्वन्ति ।

१०. गजस्य _______ (४) पादाः, ______ (२) दन्तौ, ______ (१) शुण्डा च भवन्ति ।

११. एतस्मिन् प्रदेशे _______ (२) नद्यौ प्रवहतः।

१३. कक्षायां _______ (२०) बालकाः _______ (१८) बालिकाः च पठन्ति।

१४. _______ (२) ऋषी ध्यानं कुरुतः ।

# तुमुन् प्रत्ययः

(Infinitives)

# तुमुन् प्रत्ययः

तुमुन् → त् उ म् ~~उन्~~ → त् उ म् → तुम्

के लिए

- बालकः धावति, क्रीडाङ्गणं गच्छति।
  बालकः धावितुं क्रीडाङ्गणं गच्छति।
- युवकः पठिष्यति। पुस्तकं स्वीकरिष्यति।
  युवकः पठितुं पुस्तकं स्वीकरिष्यति।
- शिशुः अचलत्। प्रयत्नम् अकरोत्।
  शिशुः चलितुं प्रयत्नम् अकरोत्।
- मातरः अर्चिष्यन्ति। मन्दिरं गमिष्यन्ति।
  मातरः अर्चितुं मन्दिरं गमिष्यन्ति।
- भ्राता जलम् अपिबत्। पाकशालाम् अगच्छत्।
  भ्राता जलं पातुं पाकशालाम् अगच्छत्।
- अहं वैज्ञानिकः भविष्यामि। सम्यक् पठिष्यामि।
  अहं वैज्ञानिकः भवितुं सम्यक् पठिष्यामि।

| धातु | लट् | तुमुनान्तं |
| --- | --- | --- |
| आ+नी | आनयति | आनेतुम् |
| उत्+स्था | उत्तिष्ठति | उत्थातुम् |
| क्रीड् | क्रीडति | क्रीडितुम् |
| खाद् | खादति | खादितुम् |
| खेल् | खेलति | खेलितुम् |
| गम् | गच्छति | गन्तुम् |
| गै | गायति | गातुम् |
| चल् | चलति | चलितुम् |
| चिन्त् | चिन्तयति | चिन्तयितुम् |
| ज्ञा | जानाति | ज्ञातुम् |
| दा | ददाति | दातुम् |
| दृश् | पश्यति | द्रष्टुम् |
| धाव् | धावति | धावितुम् |
| नम् | नमति | नन्तुम् |

| धातु | लट् | तुमुनान्तं |
|---|---|---|
| नी | नयति | नेतुम् |
| नृत् | नृत्यति | नर्तितुम् |
| पच् | पचति | पक्तुम् |
| प्र+विश् | प्रविशति | प्रवेष्टुम् |
| प्रच्छ् | पृच्छति | प्रष्टुम् |
| भक्ष् | भक्षयति | भक्षयितुम् |
| भाष् | भाषते | भाषितुम् |
| भू | भवति | भवितुम् |
| याच् | याचते | याचितुम् |
| रक्ष् | रक्षति | रक्षितुम् |
| रच् | रचयति | रचयितुम् |
| लभ् | लभते | लब्धुम् |

| धातु | लट् | तुमुनान्तं |
| --- | --- | --- |
| लिख् | लिखति | लेखितुम् |
| वद् | वदति | वदितुम् |
| वस् | वसति | वस्तुम् |
| श्रु | शृणोति | श्रोतुम् |
| स्था | तिष्ठति | स्थातुम् |
| स्मृ | स्मरति | स्मर्तुम् |
| हस् | हसति | हसितुम् |

सः भ्रमणाय/भ्रमणार्थं गच्छति। भ्रमितुम्

शिशवः खेलनाय/खेलनार्थं इच्छन्ति। खेलितुम्

त्वं पठनाय/पठनार्थं प्रयत्नं कुरु। पठितुम्

आवां पुष्पमालां रचनाय/रचनार्थं वाटिकां गमिष्यावः। रचितुम्

शिक्षकः पाठनाय/पाठनार्थं विद्यालयम् आगच्छति। पाठयितुम्

सैनिकाः रक्षणाय/रक्षणार्थं सीमाप्रदेशे भवन्ति। रक्षितुम्

# स्वाध्यायः

**प्रत्ययं योजयित्वा विभज्य वा रिक्तस्थानानि पूरयत।**

१) अहं अभियन्ता <u>भवितुम्</u> इच्छामि। (भू+तुमुन्) अभियन्त्री

२) वयं पित्रा सह चलचित्रं <u>द्रष्टुम्</u> गच्छामः। (दृश्+तुमुन्)

३) हे गुरो ! किम् अहं प्रश्नं <u>प्रच्छ+तुमुन्</u> शक्नोमि ? (प्रष्टुम्)

४) किम् अहं हस्तं <u>प्र+क्षाल्+तुमुन्</u> प्रसाधनं गच्छामि ? (प्रक्षालयितुम्)

५) मम मित्रं मम गृहं <u>आगन्तुम्</u> इच्छति। (आ+गम्+तुमुन्)

६) ग्रीष्मकाले वयं श्रीनगरं <u>गन्तुम्</u> चिन्तयामः। (गम् + तुमुन्)

७) मम पितामहः दर्शनं <u>कर्तुम्</u> मन्दिरं गच्छति। (कृ+तुमुन्)

## *अवधातव्याः अंशाः*

१ मञ्जूषा में दिए गए शब्द केवल सहायता के लिए है । चित्र के अनुसार अन्य शब्दों का चयन भी कर सकते है ।

२ क्रियापद के निर्माण में कर्ता के लिङ्ग, वचन और पुरुष को ध्यान में रखिए ।

३ उपपद विभक्तियों का प्रयोग यथास्थान करें जैसे परित:(चारों ओर), उभयत:(दोनों ओर), पुरत:(आगे), पृष्ठत:(पीछे), उपरि(उपर), अध:(नीचे), समीपे(पास) इत्यादि ।

४ उपपद विभक्तियों के प्रयोग के समय उचित विभक्तियों का भी ध्यान रखें जैसे

- परितः, उभयतः के साथ द्वितीया विभक्ति, तथा पुरतः,पृष्ठतः, उपरि, अधः के साथ षष्ठी विभक्ति

५ विशेषण तथा सर्वनाम का प्रयोग करते समय लिङ्ग, विभक्ति तथा वचन का ध्यान रखें । अर्थात् जो लिङ्ग, विभक्ति तथा वचन विशेष्य के होते है, वही लिङ्ग, विभक्ति तथा वचन विशेषण को भी होते है ।

- सर्वे / उत्तमाः बालकाः, सर्वाः / उत्तमाः बालिकाः, सर्वाणि / उत्तमानि गृहाणि
- एकः युवकः / कविः एका नदी / महिला एकम् वनम् / भवनम्

६ वाक्य का मूल्यांकन व्याकरण, मौलिकता, विषयवस्तु के आधार पर किया जाता है ।

७ वाक्य अतिदीर्घ या अतिलघु न हो ।

| | एकवचनम् | | द्विवचनम् | | बहुवचनम् | |
|---|---|---|---|---|---|---|
| पुल्लिङ्गम् | **एकः** | वृक्षः,बालकः, मार्गः, जनः, वृद्धः, छात्रः, विद्यालयः, मेघः, पर्वतः, तरणतालः, खगः, प्रसन्नः, आनन्दितः, विशालः, शिशुः, ध्वजः, पक्षी, आसन्दः, नरः | **द्वौ** | वृक्षौ, बालकौ, मार्गौ, जनौ, वृद्धौ, छात्रौ, पर्वतौ विद्यालयौ, मेघौ, खगौ, प्रसन्नौ,आनन्दितौ, विशालौ, शिशू, ध्वजौ, पक्षिणौ, आसन्दौ, नरौ | **त्रयः,चत्वारः, पञ्च, षट्, सप्त, बहवः, सर्वे, ते, एते, अनेके** | वृक्षाः, मार्गाः, बालकाः, जनाः, वृद्धाः, छात्राः, पर्वताः, खगाः, मेघाः, प्रसन्नाः, विशालाः, आनन्दिताः, शिशवः, ध्वजाः, पक्षिणः, आसन्दाः, नराः |
| स्त्रीलिङ्गम् | **एका** | महिला, छात्रा, वाटिका, नदी, नौका, प्रसन्ना, आनन्दिता, विशाला, वृद्धा, क्रीडा, नारी, लेखनी, उत्पीठिका, बालिका | **द्वे** | महिले, छात्रे, वाटिके, नद्यौ, नौके, प्रसन्ने, आनन्दिते, विशाले, वृद्धे, क्रीडे, नार्यौ, लेखन्यौ, उत्पीठिके, बालिके | **तिस्रः,चतस्रः, पञ्च, षट्, सप्त, बहव्यः, सर्वाः, ताः, एताः, अनेकाः** | महिलाः, छात्राः, नौकाःवाटिकाः, नद्यः, प्रसन्नाः, आनन्दिताः, विशालाः, वृद्धाः, क्रीडाः, नार्यः, लेखन्यः, उत्पीठिकाः, बालिकाः |
| नपुंसकलिङ्गम् | **एकम्** | वनम्, उद्यानम्, गृहम्, आपणम्, पुष्पम्, पात्रम्, स्फोटकम्, क्षेत्रम्, पुस्तकम्, वातायनम्, विशालम् | **द्वे** | वने, उद्याने, गृहे, आपणे, पुष्पे, पात्रे, स्फोटके, क्षेत्रे, पुस्तके, वातायने, विशाले | **त्रीणि, चत्वारि, पञ्च, षट्, सप्त, बहूनि, सर्वाणि, तानि, एतानि, अनेकानि** | वनानि, गृहाणि, उद्यानानि, आपणानि, पुष्पाणि, पात्राणि, स्फोटकानि, क्षेत्राणि, पुस्तकानि, वातायनानि, विशालानि |
| क्रियापदानि | **अस्ति, विद्यते, वर्तते, क्रीडति, खेलति, पश्यति, करोति, गच्छति, नयति, भ्रमति, कूजति, खादति, उड्डयति, नृत्यति, पृच्छति ददाति, यच्छति, दृश्यते, उपविष्टः, उपविष्टा** | | **स्तः, विद्येते, वर्तेते, क्रीडतः, खेलतः, पश्यतः, कुरुतः,गच्छतः, नयतः, भ्रमतः, कूजतः, खादतः, उड्डयतः, नृत्यतः, पृच्छतः, दत्तः, यच्छतः, दृश्येते, उपविष्टौ, उपविष्टे** | | **सन्ति, विद्यन्ते, वर्तन्ते, क्रीडन्ति, खेलन्ति, पश्यन्ति, कुर्वन्ति, गच्छन्ति, नयन्ति, भ्रमन्ति, कूजन्ति, खादन्ति, उड्डयन्ति, नृत्यन्ति, पृच्छन्ति, ददति, यच्छन्ति, दृश्यन्ते, उपविष्टाः, उपविष्टाः** | |

(1)




बालकाः, शिक्षिका, ददाति, शृण्वन्ति, उपरि, चित्रम्, फलके, उत्पीठिकायाम्, पश्यन्ति, प्रश्नान्, पुस्तके, उपविष्टाः, हस्तं, मानचित्रम्, दर्शयति, बालिकाः, कक्षायाम्, भूगोलम्, दक्षिणतः, पुस्तके, ध्यानेन, आसन्दः, कक्षायाः

(2)



बालकाः, ददाति, शृण्वन्ति, उपरि, उत्पीठिकायाम्, पश्यन्ति, प्रश्नान्, पुस्तके, उपविष्टाः, हस्तं, दर्शयति, बालिका, पुस्तकालये, वर्तमानपत्रम्, आगच्छन्ति, शान्तिः, पठन्ति, ददति, पठति, क्रमेण, सन्ति, पुस्तके, पुस्तकालयस्य,

(3)



बालकाः, उपरि, पश्यन्ति, सूर्यः, बालिका, आगच्छतः, शान्तिः, सूर्योदये, जनकेन, अधः, खगाः, वृक्षाः, योगासनम्, भ्रमन्ति, पर्वताः, आनन्दिताः, कन्दुकेन, पश्यन्ति, चलन्ति, आह्लादकम्, प्रातःकाले, पुष्पाणि, मार्गे, चलतः, भार्या

(4)



बालकाः, उपरि, पश्यन्ति, बालिका, आगच्छन्ति, शान्तिः, सूर्योदये, भार्यया, अधः, खगाः, उद्याने, वृक्षाः, क्रीडन्ति, भ्रमन्ति, पर्वताः, आनन्दिताः, कन्दुकम्, मार्गः, बालकेन, सूर्योदयस्य, नौकायाम्, योगासनम्, व्यायामम्

पाठः - २ स्वर्णकाकः

प्रस्तुतोऽयं पाठः श्रीपद्मशास्त्रिणा विरचितम् "विश्वकथाशतकम्" इति कथासङ्ग्रहात्गृहीतोऽस्ति। अत्र विविधराष्ट्रेषु व्याप्तानां शतं लोककथानां वर्ननं विद्यते। एषा कथा वर्म(म्यांमार) देशस्य श्रेष्ठा लोककथा अस्ति। अस्यां कथायां लोभस्य दुष्परिणामः तथा च त्यागस्य सुपरिणामः स्वर्णपक्षकाकमाध्यमेन वर्णितोऽस्ति।

पुरा कस्मिंश्चिद् ग्रामे एका निर्धना वृद्धा स्त्री न्यवसत्। तस्याः च एका दुहिता विनम्रा मनोहरा चासीत्। एकदा माता स्थाल्यां तण्डुलान् निक्षिप्य पुत्रीम् आदीशत्। "सूर्यातपे तण्डुलान् खगेभ्यो रक्ष" किञ्चित् कालादनन्तरम् एको विचित्रः काकः समुड्डीय तस्याः समीपम् अगच्छत्।

नैतादृशः स्वर्णपक्षो रजतचञ्चुः स्वर्णकाकस्तया पूर्वं दृष्टः। तं तण्डुलान् खादन्तं हसन्तञ्च विलोक्य बालिका रोदितुमारब्धा। तं निवारयन्ती सा प्रार्थयत् – "तण्डुलान् मा भक्षय । मदीया माता अतीव निर्धना वर्तते।" स्वर्णपक्षः काकः प्रोवाच, "मा शुचः। सूर्योदयात्प्राग् ग्रामाद्बहिः पिप्पलवृक्षमनु त्वया आगन्तव्यम्। अहं तुभ्यं तण्डुलमूल्यं दास्यामि।" प्रहर्षिता बालिका निद्रामपि न लेभे।

सूर्योदयात्पूर्वमेव सा तत्रोपस्थिता। वृक्षस्योपरि विलोक्य सा च आश्चर्यचकिता सञ्जाता यत् तत्र स्वर्णमयः प्रासादो वर्तते। यदा काकः शयित्वा प्रबुद्धस्तदा तेन स्वर्णगवाक्षात्कथितं "हंहो बाले ! त्वमागता, तिष्ठ, अहं त्वत्कृते सोपानमवतारयामि, तत्कथय स्वर्णमयं रजतमयम् ताम्रमयं वा"? कन्या अवदत् "अहं निर्धनमातुः दुहिता अस्मि। ताम्रसोपानेनैव आगमिष्यामि" परं स्वर्णसोपानेन सा स्वर्णभवनम् आरोहत।

चिरकालं भवने चित्रविचित्रवस्तूनि सज्जितानि दृष्ट्वा सा विस्मयं गता" श्रान्तां तां विलोक्य काकः अवदत्-"पूर्वं लघुप्रातराशः क्रियताम् – वद त्वं स्वर्णस्थाल्यां भोजनं करिष्यसि किं वा रजतस्थाल्यां उत ताम्रस्थाल्याम् "? तदा सा आश्चर्यचकिता सञ्जाता यदा स्वर्णकाकेन स्वर्णस्थाल्यां भोजनं परिवेषितम्। न एतादृशं स्वादु भोजनमद्यावधि बालिका खादितवती। काकोऽवदत्- बालिके! अहमिच्छामि यत् त्वम् सर्वदा अत्रैव तिष्ठ परं तव माता तु एकाकिनी वर्तते। अतः "त्वं शीघ्रमेव स्वगृहं गच्छ।"इत्युक्त्वा काकः कक्षाभ्यन्तरात् तिस्रः मञ्जूषाः निस्सार्य तां प्रत्यवदत् - "बालिके! यथेच्छं गृहाण मञ्जूषामेकाम्" लघुतमां मञ्जूषां प्रगृह्य बालिकया कथितम् इयत् एव मदीयतण्डुलानां मूल्यम्।

गृहमागत्य तया मञ्जूषा समुद्घाटिता, तस्यां महार्हाणि हीरकाणि विलोक्य सा प्रहर्षिता तद्दिनाद्धनिका च सञ्जाता। तस्मिन्नेव ग्रामे एका अपरा लुब्धा वृद्धा न्यवसत्। तस्या अपि एका पुत्री आसीत्। ईर्ष्यया सा तस्य स्वर्णकाकस्य रहस्यं ज्ञातवती। सूर्यातपे तण्डुलान् निक्षिप्य तयापि स्वसुता रक्षार्थं नियुक्ता। तथैव स्वर्णपक्षः काकः तण्डुलान् भक्षयन् तामपि तत्रैवकारयत्। प्रातस्तत्रगत्वा सा काकं निर्भर्त्सयन्ती प्रावोचत् – "भो नीचकाक! अहमागता, मह्यं तण्डुलमूल्यं प्रयच्छ।" काकोऽब्रवीत्- "अहं त्वत्कृते सोपानम् अवतारयामि तत्कथय स्वर्णमयं रजतमयं ताम्रमयं वा।" गर्वितया बालिकया प्रोक्तम्- "स्वर्णमयेन सोपानेन अहम् आगच्छामि।" परं स्वर्णकाकस्तत्कृते ताम्रमयं सोपानमेव प्रायच्छत्। स्वर्णकाकस्तां भोजनमपि ताम्रभाजने एव अकारयत्।

प्रतिनिवृत्तिकाले स्वर्णकाकेन कक्षाभ्यन्तरात् तिस्रः मञ्जूषाः तत्पुरः समुत्क्षिप्ताः। लोभाविष्टा सा बृहत्तमां मञ्जूषां गृहीतवती। गृहमागत्य सा तर्षिता यावद् मञ्जूषामुद्घाटयति तावत् तस्यां भीषणः कृष्णसर्पो विलोकितः लुब्धया बालिकया लोभस्य फलं प्राप्तम्। तदनन्तरं सा लोभं पर्यत्यजत्।

- एकपदेन उत्तरं लिखत-

क) माता काम् आदिशत्? बालिकाम्

ख) स्वर्णकाकः कान् अखादत्? तण्डुलान्

ग) प्रासादः कीदृशः वर्तते? स्वर्णमयः

घ) गृहमागत्य तया का समुद्घाटिता? मञ्जूषा

ङ) लोभाविष्टा बालिका कीदृशीं मञ्जूषां नयति? बृहत्तमाम्

- पूर्णवाक्येन उत्तरत-

क) निर्धनायाः वृद्धायाः दुहिता कीदृशी आसीत्? विनम्रा मनोहरा च

ख) बालिकया पूर्वं कीदृशः काकः न दृष्टः आसीत्? स्वर्णपक्षः रजतचञ्चूः

ग) निर्धनायाः दुहिता मञ्जूषायां कानि अपश्यत्? महार्हाणि हीरकानि

घ) बालिका किं दृष्ट्वा आश्चर्यचकिता जाता? स्वर्णकाकः

ङ) गर्विता बालिका कीदृशं सोपानम् अयाचत कीदृशं च प्राप्नोत्? स्वर्णमयं अयाचत ताम्रमयं प्राप्नोत्

- अधोलिखितानां शब्दानां विलोमपदं पाठात् चित्वा लिखत-

१) पश्चात् - पूर्वम्

२) हसितुम् - रोदितुम्

३) अधः - उपरि

४) श्वेतः - कृष्णः
५) सूर्यास्तः - सूर्योदयः
६) सुप्तः - प्रबुद्धः

- सन्धिं कुरुत-

१) नि + अवसत् - न्यवसत्
२) सूर्य + उदयः - सूर्योदयः
३) वृक्षस्य + उपरि - वृक्षस्योपरि
४) हि + अकारयत् - ह्यकारयत्
५) च + एकाकिनी - चैकाकिनी
६) इति + उक्त्वा - इत्युक्त्वा
७) प्रति + अवदत् - प्रत्यवदत्
८) प्र + उक्तम् -प्रोक्तम्
९) अत्र + एव -अत्रैव
१०) तत्र + उपस्थिता -तत्रोपस्थिता
११) यथा + इच्छम् - यथेच्छम्

- स्थूलपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत-

क) ग्रामे **निर्धना स्त्री** अवसत्। का
ख) **स्वर्णकाकं** निवारयन्ती बालिका प्रार्थयत्। कम्
ग) **सूर्योदयात्** पूर्वमेव बालिका तत्रोपस्थिता। कस्मात्
घ) बालिका **निर्धनमातुः** दुहिता आसीत्। कस्याः
ङ) लुब्धा वृद्धा **स्वर्णकाकस्य** रहस्यमभिज्ञातवती। कस्य

- प्रकृति-प्रत्यय-संयोगं कुरुत।

क) वि+लोकृ+ल्यप् - विलोक्य
ख) नि+क्षिप्+ल्यप् - निक्षिप्य
ग) आ+गम्+ल्यप् - आगम्य आगत्य
घ) दृश्+क्त्वा - दृष्ट्वा
ङ) शी+क्त्वा - शयित्वा
च) लघु+तमप् - लघुतम (लघुतमः लघुतमा लघुतमम्)

- प्रकृतिप्रत्यय-विभागं कुरुत-

क) रोदितुम् - रुद् + तुमु
ख) दृष्ट्वा - दृश् + क्त्वा
ग) विलोक्य - वि + लुक्+ल्यप्
घ) निक्षिप्य - नि+क्षिप्+ल्यप्
ङ) आगत्य - आ+गम्+ल्य
च) शयित्वा - शी+क्त्वा
छ) लघुतमम् - लघु+तमप्

- अधोलिखितानि कथनानि कः/का, कं/कां च कथयति-

| क्रमः | कथनम् | वक्ता<br>कः/का | श्रोता<br>कं / काम् |
|---|---|---|---|
| क) | पूर्वं प्रातराशः क्रियताम्। | काकः | बालिकाम् |
| ख) | सूर्यातपे तण्डुलान् खगेभ्यो रक्ष। | वृद्धा | बालिकाम् |
| ग) | अहं तुभ्यं तण्डुलमूल्यं दास्यामि। | काकः | बालिकाम् |
| घ) | भो नीचकाक! अहमागता, मह्यं तण्डुलमूल्यं प्रयच्छ। | लुब्धा बालिका | काकम् |

उदाहरणमनुसृत्य कोष्ठकगतेषु पदेषु पञ्चमीविभक्तेः प्रयोगं कृत्वा रिक्तस्थानानि पूरयत-

यथा – मूषकः बिलाद् बहिः निर्गच्छति। (बिल)

क) जनः .................... बहिः आगच्छति। (ग्रामः) ग्रामात्

ख) नद्यः .................... निस्सरन्ति। (पर्वत) पर्वतात्

ग) .................... पत्राणि पतन्ति। (वृक्ष) वृक्षात्

घ) बालकः .................... बिभेति? (सिंह) सिंहात्

ङ) ईश्वरः .................... त्रायते। (क्लेश) क्लेशात्

च) प्रभुः भक्तं .................... निवारयति। (पाप) पापात्

# स्वरसन्धिः

## सन्धिः(संहिता)

“परः सन्निकर्षः संहिता ॥ (पाणिनीय सूत्र) के अनुसार, अक्षरों के अतिशय समीपता के कारण उत्पन्न कोई भी विकार या परिवर्तन को संहिता (संधि) कहते है ।

**संहिता एकपदे नित्या, नित्या धातुपसर्गयोः । नित्या समासे, वाक्ये तु सा विवक्षामपेक्षते ॥**

अर्थात् – संहिता(संधि) एक पदमें, धातु तथा उपसर्ग में और समास में नित्य होती है । वाक्य में संधि वक्ता की विवक्षा पर निर्भर है। जैसे –

- एक पद में - परि + नामः = परिणामः
- धातु + उपसर्ग - अनु + अगच्छत् = अन्वगच्छत्
- समास में - विद्या + आलयः = विद्यालयः
- वाक्य में - विवेकः गृहम् गच्छति = विवेकः गृहं गच्छति / गृहङ्गच्छति।

## प्रकार

१) स्वरसन्धिः २) व्यंजनसन्धिः ३) विसर्गसन्धिः

# स्वरसन्धिः

## १) स्वरसन्धिः

### १.१) दीर्घसन्धिः (सवर्णसन्धिः/सजातीय-स्वरसन्धिः) (अकः सवर्णे दीर्घः । पा.सू.६।१।१०१)

| | | | | |
|---|---|---|---|---|
| अ/आ | + | अ/आ | = | आ |
| इ/ई | + | इ/ई | = | ई |
| उ/ऊ | + | उ/ऊ | = | ऊ |
| ऋ/ॠ | + | ऋ/ॠ | = | ॠ |

**ह्रस्वस्वरः/दीर्घस्वरः + ह्रस्वस्वरः/दीर्घस्वरः = दीर्घस्वरः**

- सन्धि में वर्णों का उच्चारण स्थान का महत्त्व है ।
- अधोलिखित शब्दों को ध्यान में रखिए ।
  ईक्षा, ईशः, ईश्वरः, वधूः, इन्द्रः, उदयः, ऊर्मिः, ऊर्जा, ऊर्ध्वम्, ऐश्वर्यम्, ऐक्यम्, ओषधिः
- तथैव – रु ≠ रू, त्त = क्त, ऋ ≠ ॠ, पितृ-पितॄणाम्

# स्वरसन्धिः

अभ्यासः –

(अधोलिखित उदाहरणों को ध्यान से पढिए। यथा – *सूर्य+अस्तः = सूर्यास्तः = सूर्य+अस्तः*)

| | | | | | |
|---|---|---|---|---|---|
| १ | सूर्य | + | अस्तः | = | सूर्यास्तः |
| २ | वेद | + | अन्तः | = | वेदान्तः |
| ३ | वसन्त | + | आगमः | = | वसन्तागमः |
| ४ | मुनि | + | इन्द्रः | = | मुनीन्द्रः |
| ५ | देवी | + | इयम् | = | देवीयम् |
| ६ | साधु | + | उदयः | = | साधूदयः |
| ७ | सु | + | उक्तिः | = | सूक्तिः |
| ८ | लघु | + | ऊर्मिः | = | लघूर्मिः |
| ९ | वधू | + | उत्सवः | = | वधूत्सवः |
| १० | पितृ | + | ऋणम् | = | पितृणम् |

| | | | | | |
|---|---|---|---|---|---|
| ११ | सुखार्थी | = | सुख | + | अर्थी |
| १२ | परमार्थः | = | परम | + | अर्थः |
| १३ | विद्यार्थी | = | विद्या | + | अर्थी |
| १४ | अभीष्टः | = | अभि | + | इष्टः |
| १५ | रजनी | = | रजनी | + | ईशः |
| १६ | गुरूपदेशः | = | गुरु | + | उपदेशः |
| १७ | इन्दूदयः | = | इन्दु | + | उदयः |
| १८ | भानूर्जा | = | भानु | + | ऊर्जा |
| १९ | भूर्जा | = | भू | + | ऊर्जा |
| २० | दातृणम् | = | दातृ | + | ऋणम् |

## स्वरसन्धिः

### १.२) गुणसन्धिः (अदेङ् गुणः।१।१।२, आद्गुणः । पा.सू.६।१।८७)

| | | | | |
|---|---|---|---|---|
| अ/आ | + | इ/ई | = | ए |
| | + | उ/ऊ | = | ओ |
| | + | ऋ/ॠ | = | अर् |

नर + ईशः

न् अ र् [अ + ई] श् अ :

ए

न् अ र् ए श् अ :

नरेशः

देव + ऋषिः

द् ए व् [अ + ऋ] ष् इ :

अर्

द् ए व् अर् ष् इ :

देवर्षिः

# स्वरसन्धिः

अभ्यासः –

(अधोलिखित उदाहरणों को ध्यान से पढिए। यथा – *धन+इन्द्रः = धनेन्द्रः = धन+इन्द्रः*)

| | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| १ | नर | + | इन्द्रः | = | नरेन्द्रः | | ११ | ममैव | = | मम | + | एव |
| २ | गङ्गा | + | इति | = | गङ्गेति | | १२ | दर्शनेच्छा | = | दर्शन | + | इच्छा |
| ३ | सुर | + | ईश्वरः | = | सुरेश्वरः | | १३ | लतेव | = | लता | + | इव |
| ४ | महा | + | ईशः | = | महेशः | | १४ | तस्येदम् | = | तस्य | + | इदम् |
| ५ | हित | + | उपदेशः | = | हितोपदेशः | | १५ | वसन्तोत्सवः | = | वसन्त | + | उत्सवः |
| ६ | सर्व | + | उदयः | = | सर्वोदयः | | १६ | लोकोक्तिः | = | लोक | + | उक्तिः |
| ७ | महा | + | उदयः | = | महोदयः | | १७ | महोदयः | = | महा | + | उदयः |
| ८ | महा | + | उत्सवः | = | महोत्सवः | | १८ | तथोक्तम् | = | तथा | + | उक्तम् |
| ९ | सप्त | + | ऋषिः | = | सप्तर्षिः | | १९ | ग्रीष्मर्तुः | = | ग्रीष्म | + | ऋतुः |
| १० | वर्षा | + | ऋतुः | = | वर्षर्तुः | | २० | महर्षिः | = | महा | + | ऋषिः |

## १.३) वृद्धिसन्धिः (वृद्धिरादैच् ।१।१।१, वृद्धिरेच् ६।१।८८)

| | | | | |
|---|---|---|---|---|
| अ/आ | + | ए/ऐ | = | ऐ |
| | + | ओ/औ | = | औ |

तव + एव

त् अ व् अ + ए व् अ

ऐ

त् अ व् ऐ व् अ

तवैव

जल + ओधः

ज् अ ल् अ + ओ ध् अ :

औ

ज् अ ल् औ ध् अ :

जलौधः

# स्वरसन्धिः

अभ्यासः –

(अधोलिखित उदाहरणों को ध्यान से पढिए। यथा – *न + एव = नैव = न + एव*)

| | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| १ | एक | + | एकशः | = | एकैकशः | | ११ | अद्यैव | = | अद्य | + | एव |
| २ | तथा | + | एव | = | तथैव | | १२ | प्रार्थनैषा | = | प्रार्थना | + | एषा |
| ३ | सदा | + | एकता | = | सदैकता | | १३ | सदैकता | = | सदा | + | एकता |
| ४ | मत | + | ऐक्यम् | = | मतैक्यम् | | १४ | धनैश्वर्यम् | = | धन | + | ऐश्वर्यम् |
| ५ | जल | + | ओधः | = | जलौधः | | १५ | महौषधम् | = | महा | + | औषधम् |
| ६ | गङ्गा | + | ओधः | = | गङ्गौधः | | १६ | ममौदार्यम् | = | मम | + | औदार्यम् |
| ७ | च | + | एव | = | चैव | | १७ | तेनैकः | = | तेन | + | एकः |
| ८ | मम | + | एषः | = | ममैषः | | १८ | मयैव | = | मया | + | एव |
| ९ | तदा | + | एव | = | तदैव | | १९ | सदैकता | = | सदा | + | एकता |
| १० | धारा | + | ऐक्यम् | = | धारैक्यम् | | २० | महौदार्यम् | = | महा | + | औदार्यम् |

# स्वरसन्धिः

## १.३) यण्-सन्धिः (इको यणचि ६।१।७७)

| इ/ई | उ/ऊ | ऋ/ॠ | | असमान स्वर / विजातीय स्वर |
|---|---|---|---|---|
| ↓ | ↓ | ↓ | + | |
| य् | व् | र् | | |

इ तथा ई के लिए  असमान स्वर = इ तथा ई  के अलावा सारे स्वर  (अ आ उ ऊ ऋ ॠ ए ऐ ओ औ)

यदि + अपि

य् अ द् [इ + अ] प् इ

इ → य्

य् अ द् य् अ प् इ

यद्यपि

पितृ + इच्छा

प् इ त् [ऋ + इ] च् छ् आ

ऋ → र्

प् इ त् र् इ च् छ् आ

पित्रिच्छा

# स्वरसन्धिः

अभ्यासः –

(अधोलिखित उदाहरणों को ध्यान से पढिए। यथा – *अनु + अयः = अन्वयः = अनु + अयः* )

| | | | | | |
|---|---|---|---|---|---|
| १ | यदि | + | अपि | = | यद्यपि |
| २ | इति | + | आदि | = | इत्यादि |
| ३ | नदी | + | अस्ति | = | नद्यस्ति |
| ४ | सु | + | आगतम् | = | स्वागतम् |
| ५ | पितृ | + | आदेशः | = | पित्रादेशः |
| ६ | मधु | + | अरिः | = | मध्वरिः |
| ७ | नारी | + | आश्रमः | = | नार्याश्रमः |
| ८ | प्रति | + | अवदत् | = | प्रत्यवदत् |
| ९ | वि | + | आकुलः | = | व्याकुलः |
| १० | मातृ | + | इच्छा | = | मात्रिच्छा |

| | | | | | |
|---|---|---|---|---|---|
| ११ | प्रत्येकम् | = | प्रति | + | एकम् |
| १२ | प्रत्युपकारः | = | प्रति | + | उपकारः |
| १३ | नार्यस्ति | = | नारी | + | अस्ति |
| १४ | गच्छत्वेकः | = | गच्छतु | + | एकः |
| १५ | दात्रीशः | = | दातृ | + | ईशः |
| १६ | यात्विति | = | यातु | + | इति |
| १७ | नद्याकृतिः | = | नदी | + | आकृतिः |
| १८ | अत्याचारः | = | अति | + | आचारः |
| १९ | भ्रात्रुदयः | = | भ्रातृ | + | उदयः |
| २० | पित्रुपदेशः | = | पितृ | + | उपदेशः |

## १.४) अयादि-सन्धिः (एचोऽयवायावः ६।१।७८)

| ए | ऐ | ओ | औ | | |
|---|---|---|---|---|---|
| ↓ | ↓ | ↓ | ↓ | + | कोई भी स्वर |
| अय् | आय् | अव् | आव् | | |

कवे + एहि

क् अ व् ए + ए ह् इ

ए → अय्

क् अ व् अय् ए ह् इ

**कवयेहि**

मुनौ + अयम्

म् उ न् औ + अ य् अ म्

औ → आव्

म् उ न् आव् अ य् अ म्

**मुनावयम्**

# स्वरसन्धिः

अभ्यासः –

(अधोलिखित उदाहरणों को ध्यान से पढिए। यथा – *शे + अनम् = शयनम् = शे + अनम्* )

| | | | | | |
|---|---|---|---|---|---|
| १ | ने | + | अनम् | = | नयनम् |
| २ | नै | + | अकः | = | नायकः |
| ३ | नद्यै | + | इह | = | नद्यायिह |
| ४ | भो | + | अति | = | भवति |
| ५ | पौ | + | अकः | = | पावकः |
| ६ | मुनौ | + | अयम् | = | मुनावयम् |
| ७ | रौ | + | अनः | = | रावणः |
| ८ | नौ | + | इकः | = | नाविकः |
| ९ | ते | + | आसन् | = | तयासन् |
| १० | के | + | आगच्छन् | = | कयागच्छन् |

| | | | | | |
|---|---|---|---|---|---|
| ११ | ऋषे | = | ए | + | ऋषये |
| १२ | गायकः | = | गै | + | अकः |
| १३ | तस्मायिदम् | = | तस्मै | + | इदम् |
| १४ | विष्णविह | = | विष्णो | + | इह |
| १५ | द्वावेतौ | = | द्वौ | + | एतौ |
| १६ | तावपि | = | तौ | + | अपि |
| १७ | द्वावपि | = | द्वौ | + | अपि |
| १८ | तावेव | = | तौ | + | एव |
| १९ | पवनः | = | पो | + | अनः |
| २० | नयति | = | ने | + | अति |

# स्वरसन्धिः

# कालः Tense

| | | |
|---|---|---|
| वर्तमानकालः | लट् लकारः | Present Tense |
| भविष्यत्कालः | लृट् लकारः | Future Tense |
| भूतकालः | लङ्लकारः | Past Tense |
| आज्ञार्थः | लोट् लकरः | Imperative |
| विध्यर्थः | विधिलिङ् लकारः | Potential |

# Word Root – to go



# मूल धातुः गम् (गच्छ्)

**लट्**
गच्छति

**लोट्**
गच्छतु

**गम् (गच्छ्)**

**लृट्**
गमिष्यति

**विधिलिङ्**
गच्छेत्

**लङ्**
अगच्छत्

# • धातु-भेदाः



# प्रत्यया: (परस्मैपदिन: / आत्मनेपदिन:)

| | परस्मैपदिन: | | | पुरुष: | आत्मनेपदिन: | | |
|---|---|---|---|---|---|---|---|
| | एकवचनम् | द्विवचनम् | बहुवचनम् | | एकवचनम् | द्विवचनम् | बहुवचनम् |
| लट् लकार: वर्तमानकाल: | ति | त: | अन्ति | प्र.पु. | ते | इते | अन्ते |
| | सि | थ: | थ | म.पु. | से | इथे | ध्वे |
| | मि/आमि | व:/आव: | म:/आम: | उ.पु. | इ | वहे | महे |
| लृट्लकार: भविष्यत्काल: | स्यति | स्यत: | स्यन्ति | प्र.पु. | स्यते | स्येते | स्यन्ते |
| | स्यसि | स्यथ: | स्यथ | म.पु. | स्यसे | स्येथे | स्यध्वे |
| | स्यामि | स्याव: | स्याम: | उ.पु. | स्ये | स्यावहे | स्यामहे |
| लङ्-लकार: भूतकाल: | त् | ताम् | अन् | प्र.पु. | त | इताम् | अन्त |
| | : | तम् | त | म.पु. | था: | इथाम् | ध्वम् |
| | अम् | आव | आम | उ.पु. | इ | वहि | महि |
| लोट्-लकार: आज्ञार्थ: | तु | ताम् | अन्तु | प्र.पु. | ताम् | इताम् | अन्ताम् |
| | - | तम् | त | म.पु. | स्व | इथाम् | ध्वम् |
| | आनि | आव | आम | उ.पु. | ऐ | आवहै | आमहै |
| विधिलिङ् विध्यर्थ: | ईत् | ईताम् | ईयु: | प्र.पु. | ईत | ईयाताम् | ईरन् |
| | ई: | ईतम् | ईत | म.पु. | ईथा: | ईयाथाम् | ईध्वम् |
| | ईयम् | ईव | ईम | उ.पु. | ईय | ईवहि | ईमहि |

# लट्-लकारस्य प्रत्यया:

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम: / अन्य: पुरुष: 3rd Person | स: बाल: तत् <br> ति | तौ बालौ ते <br> त: | ते बाला: तानि <br> अन्ति |
| मध्यम: पुरुष: 2nd Person | त्वम् <br> सि | युवाम् <br> थ: | यूयम् <br> थ |
| उत्तम: पुरुष: 1st Person | अहम् <br> मि/आमि | आवाम् <br> व:/आव: | वयम् <br> म:/आम: |

अनन्त
**infinite**
(all dictonary Words except अस्मद् / युष्मद् )

**कर्ता**
**कर्तृपदम्**
**Subject**

# गम् – गच्छ् (जाना) लट्-लकारः (वर्तमानकालः)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः / अन्यः पुरुषः<br>3rd Person | ति | तः | अन्ति |
| | गच्छति | गच्छतः | गच्छन्ति |
| मध्यमः पुरुषः<br>2nd Person | सि | थः | थ |
| | गच्छसि | गच्छथः | गच्छथ |
| उत्तमः पुरुषः<br>1st Person | मि/आमि | वः/आवः | मः/आमः |
| | गच्छामि | गच्छावः | गच्छामः |

# गम् – गच्छ् (जाना) लृट्-लकारः (भविष्यत्कालः)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः / अन्यः पुरुषः<br>3rd Person | स्यति<br>गमिष्यति | स्यतः<br>गमिष्यतः | स्यन्ति<br>गमिष्यन्ति |
| मध्यमः पुरुषः<br>2nd Person | स्यसि<br>गमिष्यसि | स्यथः<br>गमिष्यथः | स्यथ<br>गमिष्यथ |
| उत्तमः पुरुषः<br>1st Person | स्यामि<br>गमिष्यामि | स्यावः<br>गमिष्यावः | स्यामः<br>गमिष्यामः |

# गम् – गच्छ् (जाना) लङ्-लकारः (भूतकालः)

| (आगे 'अ') | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः / अन्यः पुरुषः<br>3rd Person | त्<br>अगच्छत् | ताम्<br>अगच्छताम् | अन्<br>अगच्छन् |
| मध्यमः पुरुषः<br>2nd Person | :<br>अगच्छः | तम्<br>अगच्छतम् | त<br>अगच्छत |
| उत्तमः पुरुषः<br>1st Person | अम्<br>अगच्छम् | आव<br>अगच्छाव | आम<br>अगच्छाम |

# गम् – गच्छ् (जाना) लोट्-लकारः (आज्ञा, आदेश, अनुमति)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः / अन्यः पुरुषः 3rd Person | तु | ताम् | अन्तु |
| | गच्छतु | गच्छताम् | गच्छन्तु |
| मध्यमः पुरुषः 2nd Person | - | तम् | त |
| | गच्छ | गच्छतम् | गच्छत |
| उत्तमः पुरुषः 1st Person | आनि | आव | आम |
| | गच्छानि | गच्छाव | गच्छाम |

# गम् – गच्छ् (जाना) विधिलिङ्-लकारः (सम्भावना, आशीर्वाद, शुभेच्छा)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः / अन्यः पुरुषः 3rd Person | ईत् | ईताम् | ईयुः |
| | गच्छेत् | गच्छेताम् | गच्छेयुः |
| मध्यमः पुरुषः 2nd Person | ईः | ईतम् | ईत |
| | गच्छेः | गच्छेतम् | गच्छेत |
| उत्तमः पुरुषः 1st Person | ईयम् | ईव | ईम |
| | गच्छेयम् | गच्छेव | गच्छेम |

# गम् -गच्छ् (जाना) परस्मैपदी

| | एकवचनम् | द्विवचनम् | बहुवचनम् | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|---|
| लट् लकारः वर्तमानकालः | ति | तः | अन्ति | प्र.पु. | गच्छति | गच्छतः | गच्छन्ति |
| | सि | थः | थ | म.पु. | गच्छसि | गच्छथः | गच्छथ |
| | मि/आमि | वः/आवः | मः/आमः | उ.पु. | गच्छामि | गच्छावः | गच्छामः |
| लृट्लकारः भविष्यत्कालः | स्यति | स्यतः | स्यन्ति | प्र.पु. | गमिष्यति | गमिष्यतः | गमिष्यन्ति |
| | स्यसि | स्यथः | स्यथ | म.पु. | गमिष्यसि | गमिष्यथः | गमिष्यथ |
| | स्यामि | स्यावः | स्यामः | उ.पु. | गमिष्यामि | गमिष्यावः | गमिष्यामः |
| लङ्-लकारः भूतकालः | त् | ताम् | अन् | प्र.पु. | अगच्छत् | अगच्छताम् | अगच्छन् |
| | : | तम् | त | म.पु. | अगच्छः | अगच्छतम् | अगच्छत |
| | अम् | आव | आम | उ.पु. | अगच्छम् | अगच्छाव | अगच्छाम |
| लोट्-लकारः आज्ञार्थः | तु | ताम् | अन्तु | प्र.पु. | गच्छतु | गच्छताम् | गच्छन्तु |
| | - | तम् | त | म.पु. | गच्छ | गच्छतम् | गच्छत |
| | आनि | आव | आम | उ.पु. | गच्छानि | गच्छाव | गच्छाम |
| विधिलिङ् विध्यर्थः | ईत् | ईताम् | ईयुः | प्र.पु. | गच्छेत् | गच्छेताम् | गच्छेयुः |
| | ईः | ईतम् | ईत | म.पु. | गच्छेः | गच्छेतम् | गच्छेत |
| | ईयम् | ईव | ईम | उ.पु. | गच्छेयम् | गच्छेव | गच्छेम |

# अस् (होना) परस्मैपदी

| | एकवचनम् | द्विवचनम् | बहुवचनम् | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|---|
| लट् लकारः वर्तमानकालः | ति | तः | अन्ति | प्र.पु. | अस्ति | स्तः | सन्ति |
| | सि | थः | थ | म.पु. | असि | स्थः | स्थ |
| | मि/आमि | वः/आवः | मः/आमः | उ.पु. | अस्मि | स्वः | स्मः |
| लृट्लकारः भविष्यत्कालः | स्यति | स्यतः | स्यन्ति | प्र.पु. | भविष्यति | भविष्यतः | भविष्यन्ति |
| | स्यसि | स्यथः | स्यथ | म.पु. | भविष्यसि | भविष्यथः | भविष्यथ |
| | स्यामि | स्यावः | स्यामः | उ.पु. | भविष्यामि | भविष्यावः | भविष्यामः |
| लङ्-लकारः भूतकालः | त् | ताम् | अन् | प्र.पु. | आसीत् | आस्ताम् | आसन् |
| | : | तम् | त | म.पु. | आसीः | आस्तम् | आस्त |
| | अम् | आव | आम | उ.पु. | आसम् | आस्व | आस्म |
| लोट्-लकारः आज्ञार्थः | तु | ताम् | अन्तु | प्र.पु. | अस्तु | स्ताम् | सन्तु |
| | - | तम् | त | म.पु. | एधि | स्तम् | स्त |
| | आनि | आव | आम | उ.पु. | असानि | असाव | असाम |
| विधिलिङ् विध्यर्थः | ईत् | ईताम् | ईयुः | प्र.पु. | स्यात् | स्याताम् | स्युः |
| | ईः | ईतम् | ईत | म.पु. | स्याः | स्यातम् | स्यात |
| | ईयम् | ईव | ईम | उ.पु. | स्याम् | स्याव | स्याम |

# क्रीड् (खेलना) परस्मैपदी

| | एकवचनम् | द्विवचनम् | बहुवचनम् | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|---|
| लट् लकारः वर्तमानकालः | ति | तः | अन्ति | प्र.पु. | क्रीडति | क्रीडतः | क्रीडन्ति |
| | सि | थः | थ | म.पु. | क्रीडसि | क्रीडथः | क्रीडथ |
| | मि/आमि | वः/आवः | मः/आमः | उ.पु. | क्रीडामि | क्रीडावः | क्रीडामः |
| लृट्लकारः भविष्यत्कालः | स्यति | स्यतः | स्यन्ति | प्र.पु. | क्रीडिष्यति | क्रीडिष्यतः | क्रीडिष्यन्ति |
| | स्यसि | स्यथः | स्यथ | म.पु. | क्रीडिष्यसि | क्रीडिष्यथः | क्रीडिष्यथ |
| | स्यामि | स्यावः | स्यामः | उ.पु. | क्रीडिष्यामि | क्रीडिष्यावः | क्रीडिष्यामः |
| लङ्-लकारः भूतकालः | त् | ताम् | अन् | प्र.पु. | अक्रीडत् | अक्रीडताम् | अक्रीडन् |
| | : | तम् | त | म.पु. | अक्रीडः | अक्रीडतम् | अक्रीडत |
| | अम् | आव | आम | उ.पु. | अक्रीडम् | अक्रीडाव | अक्रीडाम |
| लोट्-लकारः आज्ञार्थः | तु | ताम् | अन्तु | प्र.पु. | क्रीडतु | क्रीडताम् | क्रीडन्तु |
| | - | तम् | त | म.पु. | क्रीड | क्रीडतम् | क्रीडत |
| | आनि | आव | आम | उ.पु. | क्रीडानि | क्रीडाव | क्रीडाम |
| विधिलिङ् विध्यर्थः | ईत् | ईताम् | ईयुः | प्र.पु. | क्रीडेत् | क्रीडेताम् | क्रीडेयुः |
| | ईः | ईतम् | ईत | म.पु. | क्रीडेः | क्रीडेतम् | क्रीडेत |
| | ईयम् | ईव | ईम | उ.पु. | क्रीडेयम् | क्रीडेव | क्रीडेम |

# पठ् (पढना) परस्मैपदी

| | एकवचनम् | द्विवचनम् | बहुवचनम् | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|---|
| लट् लकारः वर्तमानकालः | ति | तः | अन्ति | प्र.पु. | पठति | पठतः | पठन्ति |
| | सि | थः | थ | म.पु. | पठसि | पठथः | पठथ |
| | मि/आमि | वः/आवः | मः/आमः | उ.पु. | पठामि | पठावः | पठामः |
| लृट्लकारः भविष्यत्कालः | स्यति | स्यतः | स्यन्ति | प्र.पु. | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| | स्यसि | स्यथः | स्यथ | म.पु. | पठिष्यसि | पठिष्यथः | पठिष्यथ |
| | स्यामि | स्यावः | स्यामः | उ.पु. | पठिष्यामि | पठिष्यावः | पठिष्यामः |
| लङ्-लकारः भूतकालः | त् | ताम् | अन् | प्र.पु. | अपठत् | अपठताम् | अपठन् |
| | : | तम् | त | म.पु. | अपठः | अपठतम् | अपठत |
| | अम् | आव | आम | उ.पु. | अपठम् | अपठाव | अपठाम |
| लोट्-लकारः आज्ञार्थः | तु | ताम् | अन्तु | प्र.पु. | पठतु | पठताम् | पठन्तु |
| | - | तम् | त | म.पु. | पठ | पठतम् | पठत |
| | आनि | आव | आम | उ.पु. | पठानि | पठाव | पठाम |
| विधिलिङ् विध्यर्थः | ईत् | ईताम् | ईयुः | प्र.पु. | पठेत् | पठेताम् | पठेयुः |
| | ईः | ईतम् | ईत | म.पु. | पठेः | पठेतम् | पठेत |
| | ईयम् | ईव | ईम | उ.पु. | पठेयम् | पठेव | पठेम |

# पा-पिब् (पीना) परस्मैपदी

| | एकवचनम् | द्विवचनम् | बहुवचनम् | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|---|
| लट् लकार: वर्तमानकाल: | ति | त: | अन्ति | प्र.पु. | पिबति | पिबत: | पिबन्ति |
| | सि | थ: | थ | म.पु. | पिबसि | पिबथ: | पिबथ |
| | मि/आमि | व:/आव: | म:/आम: | उ.पु. | पिबामि | पिबाव: | पिबाम: |
| लृट्लकार: भविष्यत्काल: | स्यति | स्यत: | स्यन्ति | प्र.पु. | पास्यति | पास्यत: | पास्यन्ति |
| | स्यसि | स्यथ: | स्यथ | म.पु. | पास्यसि | पास्यथ: | पास्यथ |
| | स्यामि | स्याव: | स्याम: | उ.पु. | पास्यामि | पास्याव: | पास्याम: |
| लङ्-लकार: भूतकाल: | त् | ताम् | अन् | प्र.पु. | अपिबत् | अपिबताम् | अपिबन् |
| | : | तम् | त | म.पु. | अपिब: | अपिबतम् | अपिबत |
| | अम् | आव | आम | उ.पु. | अपिबम् | अपिबाम | अपिबाम |
| लोट्-लकार: आज्ञार्थ: | तु | ताम् | अन्तु | प्र.पु. | पिबतु | पिबताम् | पिबन्तु |
| | - | तम् | त | म.पु. | पिब | पिबतम् | पिबत |
| | आनि | आव | आम | उ.पु. | पिबानि | पिबाव | पिबाम |
| विधिलिङ् विध्यर्थ: | ईत् | ईताम् | ईयु: | प्र.पु. | पिबेत् | पिबेताम् | पिबेयु: |
| | ई: | ईतम् | ईत | म.पु. | पिबे: | पिबेतम् | पिबेत |
| | ईयम् | ईव | ईम | उ.पु. | पिबेयम् | पिबेव | पिबेम |

# भू (होना) परस्मैपदी

| | एकवचनम् | द्विवचनम् | बहुवचनम् | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|---|
| लट् लकारः वर्तमानकालः | ति | तः | अन्ति | प्र.पु. | भवति | भवतः | भवन्ति |
| | सि | थः | थ | म.पु. | भवसि | भवथः | भवथ |
| | मि/आमि | वः/आवः | मः/आमः | उ.पु. | भवामि | भवावः | भवामः |
| लृट्लकारः भविष्यत्कालः | स्यति | स्यतः | स्यन्ति | प्र.पु. | भविष्यति | भविष्यतः | भविष्यन्ति |
| | स्यसि | स्यथः | स्यथ | म.पु. | भविष्यसि | भविष्यथः | भविष्यथ |
| | स्यामि | स्यावः | स्यामः | उ.पु. | भविष्यामि | भविष्यावः | भविष्यामः |
| लङ्-लकारः भूतकालः | त् | ताम् | अन् | प्र.पु. | अभवत् | अभवताम् | अभवन् |
| | : | तम् | त | म.पु. | अभवः | अभवतम् | अभवत |
| | अम् | आव | आम | उ.पु. | अभवम् | अभवाव | अभवाम |
| लोट्-लकारः आज्ञार्थः | तु | ताम् | अन्तु | प्र.पु. | भवतु | भवताम् | भवन्तु |
| | - | तम् | त | म.पु. | भव | भवतम् | भवत |
| | आनि | आव | आम | उ.पु. | भवानि | भवाव | भवाम |
| विधिलिङ् विध्यर्थः | ईत् | ईताम् | ईयुः | प्र.पु. | भवेत् | भवेताम् | भवेयुः |
| | ईः | ईतम् | ईत | म.पु. | भवेः | भवेतम् | भवेत |
| | ईयम् | ईव | ईम | उ.पु. | भवेयम् | भवेव | भवेम |

# वद् (बोलना) परस्मैपदी

| | एकवचनम् | द्विवचनम् | बहुवचनम् | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|---|
| लट् लकारः वर्तमानकालः | ति | तः | अन्ति | प्र.पु. | वदति | वदतः | वदन्ति |
| | सि | थः | थ | म.पु. | वदसि | वदथः | वदथ |
| | मि/आमि | वः/आवः | मः/आमः | उ.पु. | वदामि | वदावः | वदामः |
| लृट्लकारः भविष्यत्कालः | स्यति | स्यतः | स्यन्ति | प्र.पु. | वदिष्यति | वदिष्यतः | वदिष्यन्ति |
| | स्यसि | स्यथः | स्यथ | म.पु. | वदिष्यसि | वदिष्यथः | वदिष्यथ |
| | स्यामि | स्यावः | स्यामः | उ.पु. | वदिष्यामि | वदिष्यावः | वदिष्यामः |
| लङ्-लकारः भूतकालः | त् | ताम् | अन् | प्र.पु. | अवदत् | अवदताम् | अवदन् |
| | : | तम् | त | म.पु. | अवदः | अवदतम् | अवदत |
| | अम् | आव | आम | उ.पु. | अवदम् | अवदाव | अवदाम |
| लोट्-लकारः आज्ञार्थः | तु | ताम् | अन्तु | प्र.पु. | वदतु | वदताम् | वदन्तु |
| | - | तम् | त | म.पु. | वद | वदतम् | वदत |
| | आनि | आव | आम | उ.पु. | वदानि | वदाव | वदाम |
| विधिलिङ् विध्यर्थः | ईत् | ईताम् | ईयुः | प्र.पु. | वदेत् | वदेताम् | वदेयुः |
| | ईः | ईतम् | ईत | म.पु. | वदेः | वदेतम् | वदेत |
| | ईयम् | ईव | ईम | उ.पु. | वदेयम् | वदेव | वदेम |

# कृ (करना) उभयपदी

| | एकवचनम् | द्विवचनम् | बहुवचनम् | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|---|
| लट् लकारः वर्तमानकालः | ति | तः | अन्ति | प्र.पु. | करोति | कुरुतः | कुर्वन्ति |
| | सि | थः | थ | म.पु. | करोषि | कुरुथः | कुरुथ |
| | मि/आमि | वः/आवः | मः/आमः | उ.पु. | करोमि | कुर्वः | कुर्मः |
| लृट्लकारः भविष्यत्कालः | स्यति | स्यतः | स्यन्ति | प्र.पु. | करिष्यति | करिष्यतः | करिष्यन्ति |
| | स्यसि | स्यथः | स्यथ | म.पु. | करिष्यसि | करिष्यथः | करिष्यथ |
| | स्यामि | स्यावः | स्यामः | उ.पु. | करिष्यामि | करिष्यावः | करिष्यामः |
| लङ्-लकारः भूतकालः | त् | ताम् | अन् | प्र.पु. | अकरोत् | अकुरुताम् | अकुर्वन् |
| | : | तम् | त | म.पु. | अकरोः | अकुरुतम् | अकुरुत |
| | अम् | आव | आम | उ.पु. | अकरवम् | अकुर्व | अकुर्म |
| लोट्-लकारः आज्ञार्थः | तु | ताम् | अन्तु | प्र.पु. | करोतु | कुरुताम् | कुर्वन्तु |
| | - | तम् | त | म.पु. | कुरु | कुरुतम् | कुरुत |
| | आनि | आव | आम | उ.पु. | करवाणि | करवाव | करवाम |
| विधिलिङ् विध्यर्थः | ईत् | ईताम् | ईयुः | प्र.पु. | कुर्यात् | कुर्याताम् | कुर्युः |
| | ईः | ईतम् | ईत | म.पु. | कुर्याः | कुर्यातम् | कुर्यात |
| | ईयम् | ईव | ईम | उ.पु. | कुर्याम् | कुर्याव | कुर्याम |

# नी-नय् (ले जाना) परस्मैपदी

| | एकवचनम् | द्विवचनम् | बहुवचनम् | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|---|
| लट् लकारः वर्तमानकालः | ति | तः | अन्ति | प्र.पु. | नयति | नयतः | नयन्ति |
| | सि | थः | थ | म.पु. | नयसि | नयथः | नयथ |
| | मि/आमि | वः/आवः | मः/आमः | उ.पु. | नयामि | नयावः | नयामः |
| लृट्लकारः भविष्यत्कालः | स्यति | स्यतः | स्यन्ति | प्र.पु. | नेष्यति | नेष्यतः | नेष्यन्ति |
| | स्यसि | स्यथः | स्यथ | म.पु. | नेष्यसि | नेष्यथः | नेष्यथ |
| | स्यामि | स्यावः | स्यामः | उ.पु. | नेष्यामि | नेष्यावः | नेष्यामः |
| लङ्-लकारः भूतकालः | त् | ताम् | अन् | प्र.पु. | अनयत् | अनयताम् | अनयन् |
| | : | तम् | त | म.पु. | अनयः | अनयतम् | अनयत |
| | अम् | आव | आम | उ.पु. | अनयम् | अनयाव | अनयाम |
| लोट्-लकारः आज्ञार्थः | तु | ताम् | अन्तु | प्र.पु. | नयतु | नयताम् | नयन्तु |
| | - | तम् | त | म.पु. | नय | नयतम् | नयत |
| | आनि | आव | आम | उ.पु. | नयानि | नयाव | नयाम |
| विधिलिङ् विध्यर्थः | ईत् | ईताम् | ईयुः | प्र.पु. | नयेत् | नयेताम् | नयेयुः |
| | ईः | ईतम् | ईत | म.पु. | नयेः | नयेतम् | नयेत |
| | ईयम् | ईव | ईम | उ.पु. | नयेयम् | नयेव | नयेम |

# सेव् (सेवा करना) आत्मनेपदी

| | एकवचनम् | द्विवचनम् | बहुवचनम् | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|---|
| लट् लकारः वर्तमानकालः | ते | इते | अन्ते | प्र.पु. | सेवते | सेवेते | सेवन्ते |
| | से | इथे | ध्वे | म.पु. | सेवसे | सेवेथे | सेवध्वे |
| | इ | वहे | महे | उ.पु. | सेवे | सेवावहे | सेवामहे |
| लृट्लकारः भविष्यत्कालः | स्यते | स्येते | स्यन्ते | प्र.पु. | सेविष्यते | सेविष्येते | सेविष्यन्ते |
| | स्यसे | स्येथे | स्यध्वे | म.पु. | सेविष्यसे | सेविष्येथे | सेविष्यध्वे |
| | स्ये | स्यावहे | स्यामहे | उ.पु. | सेविष्ये | सेविष्यावहे | सेविष्यामहे |
| लङ्-लकारः भूतकालः | त | इताम् | अन्त | प्र.पु. | असेवत | असेवेताम् | असेवन्त |
| | थाः | इथाम् | ध्वम् | म.पु. | असेवेथाः | असेवेथाम् | असेवध्वम् |
| | इ | वहि | महि | उ.पु. | असेवे | असेवावहि | असेवामहि |
| लोट्-लकारः आज्ञार्थः | ताम् | इताम् | अन्ताम् | प्र.पु. | सेवताम् | सेवेताम् | सेवन्ताम् |
| | स्व | इथाम् | ध्वम् | म.पु. | सेवस्व | सेवेथाम् | सेवध्वम् |
| | ऐ | आवहै | आमहै | उ.पु. | सेवै | सेवावहि | सेवामहि |
| विधिलिङ् विध्यर्थः | ईत | ईयाताम् | ईरन् | प्र.पु. | सेवेत | सेवेयाताम् | सेवेरन् |
| | ईथाः | ईयाथाम् | ईध्वम् | म.पु. | सेवेथाः | सेवेयाथाम् | सेवेध्वम् |
| | ईय | ईवहि | ईमहि | उ.पु. | सेवेय | सेवेवहि | सेवेमहि |

# लभ् (पाना) आत्मनेपदी

| | एकवचनम् | द्विवचनम् | बहुवचनम् | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|---|
| लट् लकारः वर्तमानकालः | ते | इते | अन्ते | प्र.पु. | लभते | लभेते | लभन्ते |
| | से | इथे | ध्वे | म.पु. | लभसे | लभेथे | लभध्वे |
| | इ | वहे | महे | उ.पु. | लभे | लभावहे | लभामहे |
| लृट्लकारः भविष्यत्कालः | स्यते | स्येते | स्यन्ते | प्र.पु. | लप्स्यते | लप्स्येते | लप्स्यन्ते |
| | स्यसे | स्येथे | स्यध्वे | म.पु. | लप्स्यसे | लप्स्येथे | लप्स्यध्वे |
| | स्ये | स्यावहे | स्यामहे | उ.पु. | लप्स्ये | लप्स्यावहे | लप्स्यामहे |
| लङ्-लकारः भूतकालः | त | इताम् | अन्त | प्र.पु. | अलभत | अलभेताम् | अलभन्त |
| | थाः | इथाम् | ध्वम् | म.पु. | अलभथाः | अलभेथाम् | अलभध्वम् |
| | इ | वहि | महि | उ.पु. | अलभे | अलभावहि | अलभामहि |
| लोट्-लकारः आज्ञार्थः | ताम् | इताम् | अन्ताम् | प्र.पु. | लभताम् | लभेताम् | लभन्ताम् |
| | स्व | इथाम् | ध्वम् | म.पु. | लभस्व | लभेथाम् | लभध्वम् |
| | ऐ | आवहै | आमहै | उ.पु. | लभै | लभावहै | लभामहै |
| विधिलिङ् विध्यर्थः | ईत | ईयाताम् | ईरन् | प्र.पु. | लभेत | लभेयाताम् | लभेरन् |
| | ईथाः | ईयाथाम् | ईध्वम् | म.पु. | लभेथाः | लभेयाथाम् | लभेध्वम् |
| | ईय | ईवहि | ईमहि | उ.पु. | लभेय | लभेवहि | लभेमहि |

# याच् (माँगना) उभयपदी

| | एकवचनम् | द्विवचनम् | बहुवचनम् | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|---|
| लट् लकार: वर्तमानकाल: | ते | इते | अन्ते | प्र.पु. | याचते | याचेते | याचन्ते |
| | से | इथे | ध्वे | म.पु. | याचसे | याचेथे | याचध्वे |
| | इ | वहे | महे | उ.पु. | याचे | याचावहे | याचामहे |
| लृट्लकार: भविष्यत्काल: | स्यते | स्येते | स्यन्ते | प्र.पु. | याचिष्यते | याचिष्येते | याचिष्यन्ते |
| | स्यसे | स्येथे | स्यध्वे | म.पु. | याचिष्यसे | याचिष्येथे | याचिष्यध्वे |
| | स्ये | स्यावहे | स्यामहे | उ.पु. | याचिष्ये | याचिष्यावहे | याचिष्यामहे |
| लङ्-लकार: भूतकाल: | त | इताम् | अन्त | प्र.पु. | अयाचत | अयाचेताम् | अयाचन्त |
| | था: | इथाम् | ध्वम् | म.पु. | अयाचथा: | अयाचेथाम् | अयाचध्वम् |
| | इ | वहि | महि | उ.पु. | अयाचे | अयाचावहि | अयाचामहि |
| लोट्-लकार: आज्ञार्थ: | ताम् | इताम् | अन्ताम् | प्र.पु. | याचताम् | याचेताम् | याचन्ताम् |
| | स्व | इथाम् | ध्वम् | म.पु. | याचस्व | याचेथाम् | याचध्वम् |
| | ऐ | आवहै | आमहै | उ.पु. | याचै | याचावहै | याचामहै |
| विधिलिङ् विध्यर्थ: | ईत | ईयाताम् | ईरन् | प्र.पु. | याचेत | याचेयाताम् | याचेरन् |
| | ईथा: | ईयाथाम् | ईध्वम् | म.पु. | याचेथा: | याचेयाथाम् | याचेध्वम् |
| | ईय | ईवहि | ईमहि | उ.पु. | याचेय | याचेवहि | याचेमहि |

# ज्ञा (जानना) उभयपदी

| | एकवचनम् | द्विवचनम् | बहुवचनम् | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|---|
| लट् लकारः वर्तमानकालः | ति | तः | अन्ति | प्र.पु. | जानाति | जानीतः | जानन्ति |
| | सि | थः | थ | म.पु. | जानासि | जानीथः | जानीथ |
| | मि/आमि | वः/आवः | मः/आमः | उ.पु. | जानामि | जानीवः | जानीमः |
| लृट्लकारः भविष्यत्कालः | स्यति | स्यतः | स्यन्ति | प्र.पु. | ज्ञास्यति | ज्ञास्यतः | ज्ञास्यन्ति |
| | स्यसि | स्यथः | स्यथ | म.पु. | ज्ञास्यसि | ज्ञास्यथः | ज्ञास्यथ |
| | स्यामि | स्यावः | स्यामः | उ.पु. | ज्ञास्यामि | ज्ञास्यावः | ज्ञास्यामः |
| लङ्-लकारः भूतकालः | त् | ताम् | अन् | प्र.पु. | अजानात् | अजानीताम् | अजानन् |
| | : | तम् | त | म.पु. | अजानाः | अजानीतम् | अजानीत |
| | अम् | आव | आम | उ.पु. | अजानाम् | अजानीव | अजानीम |
| लोट्-लकारः आज्ञार्थः | तु | ताम् | अन्तु | प्र.पु. | जानातु | जानीताम् | जानन्तु |
| | - | तम् | त | म.पु. | जानीहि | जानीतम् | जानीत |
| | आनि | आव | आम | उ.पु. | जानानि | जानाव | जानाम |
| विधिलिङ् विध्यर्थः | ईत् | ईताम् | ईयुः | प्र.पु. | जानीयात् | जानीयाताम् | जानीयुः |
| | ईः | ईतम् | ईत | म.पु. | जानीयाः | जानीयातम् | जानीयात |
| | ईयम् | ईव | ईम | उ.पु. | जानीयाम् | जानीयाव | जानीयाम |

# विसर्गसन्धिः - उत्वसन्धिः

## १.२) उत्वसन्धिः (अतो रोरप्लुतादप्लुते।६।१।११३, हशि च। पा.सू.६।१।११४, आद्गुणः। पा.सू.६।१।८७)

अः + अ → ओ ऽ

अः + ३/४/५/य/र/ल/व ह → ओ

बालः + अस्ति

ब् आ ल् | अः + अ → ओऽ | स् त् इ

ब् आ ल् ओऽ स् त् इ

बालोऽस्ति

बालः + हसति

ब् आ ल् | अः + ह् → ओ | अ स् अ त् इ

ब् आ ल् ओ ह् अ स् अ त् इ

बालो हसति

- ऽ = अवग्रहः
- अ→उ→ओ

# विसर्गसन्धिः - उत्वसन्धिः

अभ्यासः –

(अधोलिखित उदाहरणों को ध्यान से पढिए। यथा – *सः+अवदत् = सोऽवदत् = सः + अवदत्* )

| | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| १ | बालः | + | अस्ति | = | बालोऽस्ति | | ११ | नृपोऽतीव | = | नृपः | + | अतीव |
| २ | मृगः | + | अपि | = | मृगोऽपि | | १२ | सिंहोऽत्र | = | सिंहः | + | अत्र |
| ३ | चन्द्रः | + | अयम् | = | चन्द्रोऽयम् | | १३ | पुरुषोऽपि | = | पुरुषः | + | अपि |
| ४ | रामः | + | अस्ति | = | रामोऽस्ति | | १४ | कृष्णोऽपि | = | कृष्णः | + | अपि |
| ५ | रामः | + | अयम् | = | रामोऽयम् | | १५ | एषोऽपतत् | = | एषः | + | अपतत् |
| ६ | सिंहः | + | गर्जति | = | सिंहो गर्जति | | १६ | मयूरो नृत्यति | = | मयूरः | + | नृत्यति |
| ७ | गजः | + | धावति | = | गजो धावति | | १७ | तरुणो नमति | = | तरुणः | + | नमति |
| ८ | वृक्षः | + | वर्धते | = | वृक्षो वर्धते | | १८ | विवेको हसति | = | विवेकः | + | हसति |
| ९ | कः | + | अपि | = | कोऽपि | | १९ | वृद्धोऽत्र | = | वृद्धः | + | अत्र |
| १० | सः | + | अस्ति | = | सोऽस्ति | | २० | कोऽयम् | = | कः | + | अयम् |

# शब्दरूपम्



बालकः

पितृ

बालिका

गुरुः

अस्मद्

मतिः

कविः

बलवान्

तत्

किम्

नदी

बाहुबलिन्

# विभक्ति पत्रम् ( स्वरान्त-शब्दाः ) ( Ending in Vowel)

| विभक्ति | अ कारान्त नपु. ( वन ) | अ कारान्त पु. ( देव ) | आ कारान्त स्त्री.( माला ) | ई कारान्त स्त्री. ( देवी ) | इ कारान्त पु. ( कवि ) | इ कारान्त स्त्री. ( मति ) | ऋ कारान्त पु. ( पितृ ) | ऋ कारान्त स्त्री. ( मातृ ) | उ कारान्त पु. ( भानु ) | उ कारान्त नपु. मधु | ऊ कारान्त स्त्री. वधू |
|---|---|---|---|---|---|---|---|---|---|---|---|
| **प्रथमा** Nominative | वनम्<br>वने<br>वनानि | देवः<br>देवौ<br>देवाः | माला<br>माले<br>मालाः | देवी<br>देव्यौ<br>देव्यः | कविः<br>कवी<br>कवयः | मतिः<br>मती<br>मतयः | पिता<br>पितरौ<br>पितरः | माता<br>मातरौ<br>मातरः | भानुः<br>भानू<br>भानवः | मधु<br>मधुनी<br>मधुनि | वधूः<br>वध्वौ<br>वध्वः |
| **द्वितीया** Accusative | वनम्<br>वने<br>वनानि | देवम्<br>देवौ<br>देवान् | मालाम्<br>माले<br>मालाः | देवीम्<br>देव्यौ<br>देवीः | कविम्<br>कवी<br>कवीन् | मतिम्<br>मती<br>मतीः | पितरम्<br>पितरौ<br>पितॄन् | मातरम्<br>मातरौ<br>मातॄः | भानुम्<br>भानू<br>भानून् | मधु<br>मधुनी<br>मधुनि | वधूम्<br>वध्वौ<br>वधूः |
| **तृतीया** Instrumental | वनेन<br>वनाभ्याम्<br>वनैः | देवेन<br>देवाभ्याम्<br>देवैः | मालया<br>मालाभ्याम्<br>मालाभिः | देव्या<br>देवीभ्याम्<br>देवीभिः | कविना<br>कविभ्याम्<br>कविभिः | मत्या<br>मतिभ्याम्<br>मतिभिः | पित्रा<br>पितृभ्याम्<br>पितृभिः | मात्रा<br>मातृभ्याम्<br>मातृभिः | भानुना<br>भानुभ्याम्<br>भानुभिः | मधुना<br>मधुभ्याम्<br>मधुभिः | वध्वा<br>वधूभ्याम्<br>वधूभिः |
| **चतुर्थी** Dative | वनाय<br>वनाभ्याम्<br>वनेभ्यः | देवाय<br>देवाभ्याम्<br>देवेभ्यः | मालायै<br>मालाभ्याम्<br>मालाभ्यः | देव्यै<br>देवीभ्याम्<br>देवीभ्यः | कवये<br>कविभ्याम्<br>कविभ्यः | मतये,मत्यै<br>मतिभ्याम्<br>मतिभ्यः | पित्रे<br>पितृभ्याम्<br>पितृभ्यः | मात्रे<br>मातृभ्याम्<br>मातृभ्यः | भानवे<br>भानुभ्याम्<br>भानुभ्यः | मधुने<br>मधुभ्याम्<br>मधुभ्यः | वध्वै<br>वधूभ्याम्<br>वधूभ्यः |
| **पञ्चमी** Ablative | वनात्<br>वनाभ्याम्<br>वनेभ्यः | देवात्<br>देवाभ्याम्<br>देवेभ्यः | मालायाः<br>मालाभ्याम्<br>मालाभ्यः | देव्याः<br>देवीभ्याम्<br>देवीभ्यः | कवेः<br>कविभ्याम्<br>कविभ्यः | मतेः, मत्याः<br>मतिभ्याम्<br>मतिभ्यः | पितुः<br>पितृभ्याम्<br>पितृभ्यः | मातुः<br>मातृभ्याम्<br>मातृभ्यः | भानोः<br>भानुभ्याम्<br>भानुभ्यः | मधुनः<br>मधुभ्याम्<br>मधुभ्यः | वध्वाः<br>वधूभ्याम्<br>वधूभ्यः |
| **षष्ठी** Genetive | वनस्य<br>वनयोः<br>वनानाम् | देवस्य<br>देवयोः<br>देवानाम् | मालायाः<br>मालयोः<br>मालानाम् | देव्याः<br>देव्योः<br>देवीनाम् | कवेः<br>कव्योः<br>कवीनाम् | मतेः, मत्याः<br>मत्योः<br>मतीनाम् | पितुः<br>पित्रोः<br>पितॄणाम् | मातुः<br>मात्रोः<br>मातॄणाम् | भानोः<br>भान्वोः<br>भानूनाम् | मधुनः<br>मधुभ्याम्<br>मधूनाम् | वध्वाः<br>वध्वोः<br>वधूनाम् |
| **सप्तमी** Locative | वने<br>वनयोः<br>वनेषु | देवे<br>देवयोः<br>देवेषु | मालायाम्<br>मालयोः<br>मालासु | देव्याम्<br>देव्योः<br>देवीषु | कवौ<br>कव्योः<br>कविषु | मतौ, मत्याम्<br>मत्योः<br>मतिसु | पितरि<br>पित्रोः<br>पितृषु | मातरि<br>मात्रोः<br>मातृषु | भानौ<br>भान्वोः<br>भानुषु | मधुनि<br>मधुनोः<br>मधुषु | वध्वाम्<br>वध्वोः<br>वधूषु |
| **सम्बोधनम्** Vocative | हे वन !<br>हे वने !<br>हे वनानि ! | हे देव !<br>हे देवौ !<br>हे देवाः ! | हे माले !<br>हे माले !<br>हे मालाः ! | हे देवि !<br>हे देव्यौ !<br>हे दव्यः ! | हे कवे !<br>हे कवी !<br>हे कवयः ! | हे मते !<br>हे मती !<br>हे मतयः ! | हे पितः !<br>हे पितरौ !<br>हे पितरः ! | हे मातः !<br>हे मातरौ !<br>हे मातरः ! | हे भानो !<br>हे भानू !<br>हे भानवः ! | हे मधु/मधो !<br>हे मधुनी<br>हे मधुनि | हे वधु !<br>हेवध्वौ !<br>हे वध्वः ! |
| | नेत्र, गृह, मित्र,<br>[illegible] | राम, वृक्ष, हस्त,<br>खग, आचार्य, नर, | रमा, लता, अम्बा,<br>महिला, जाता | नदी, पार्वती,<br>नटी, पृथिवी, | मुनि, यति, ऋषि,<br>विधि, अग्नि, भूपतिः | बुद्धि, गति,<br>शक्ति, स्मृति, | नेतृ, दातृ, सवितृ,<br>वक्तृ, श्रोतृ, भ्रातृ | दुहितृ ( पुत्री ),<br>स्वसृ ( बहन ), | तरु, शिशु, वायु,<br>प्रभु, शत्रु, साधु | जानु, तालु, वस्तु,<br>जतु, जत्रु | चमू, तनू, रज्जू,<br>श्वश्रू, जम्बू |

WWW.BHAVINPATHAK.WEBS.COM

# विभक्ति पत्रम्

| विभक्ति | प्रत्यय | एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|---|---|
| कर्ता, प्रथमा<br>Nominative | ने<br>Subject | | | | १ |
| कर्म, द्वितीया<br>Accusative | को<br>To | म् | | | २ |
| करण, तृतीया<br>Instrumental | से, के द्वारा<br>By, with | | भ्याम् | ौः / भिः | ३ |
| सम्प्रदान, चतुर्थी<br>Dative | को, के लिए<br>To , for | | भ्याम् | भ्यः | ४ |
| अपादान, पञ्चमी<br>Ablative | से, पर से<br>From | | भ्याम् | भ्यः | ५ |
| सम्बन्ध, षष्ठी<br>Genetive | का, की, के,<br>रा, री, रे, ‘s, of | | योः/ओः | नाम्/णाम् | ६ |
| अधिकरण, सप्तमी<br>Locative | मे, पर<br>In, on, above | | योः/ओः | सु / षु | ७ |
| | | | | | |

# विभक्ति पत्रम्  – एकवचनस्य भेदाः

| विभक्ति | प्रत्यय | स्त्रीलिङ्गम् माला, नदी, मति, का | व्यञ्जनान्त भवत्, गच्छत् | ऋ कारान्त पितृ / मातृ | अ कारान्त बालक, वन | इ/उ कारान्त | केवलं एकवचने |
|---|---|---|---|---|---|---|---|
| कर्ता, प्रथमा<br>Nominative | ने<br>Subject | | | | | | १ |
| कर्म, द्वितीया<br>Accusative | को<br>To | म् | | | | | २ |
| करण, तृतीया<br>Instrumental | से, के द्वारा<br>By, with | या | आ | त्रा | एन | ना | ३ |
| सम्प्रदान, चतुर्थी<br>Dative | को, के लिए<br>To , for | यै | ए | त्रे | आय | वे/ये | ४ |
| अपादान, पञ्चमी<br>Ablative | से, पर से<br>From | याः | अः | तुः | आत् | ओः/एः | ५ |
| सम्बन्ध, षष्ठी<br>Genetive | का, की, के,<br>रा, री, रे, ‘s, of | याः | अः | तुः | स्य | ओः/एः | ६ |
| अधिकरण, सप्तमी<br>Locative | मे, पर<br>In, on, above | याम् | इ | तरि | ए | औ | ७ |

WWW.BHAVINPATHAK.WEBS.COM

| विभक्तिः | | | अ कारान्तः पु देव शब्दः | | |
|---|---|---|---|---|---|
| प्रथमा | ने | Subject | देवः | देवौ | देवाः |
| द्वितीया | को | Object/to | देवम् | देवौ | देवान् |
| तृतीया | से/केद्वारा | by, with | देवेन | देवाभ्याम् | देवैः |
| चतुर्थी | को/के लिए | to, for | देवाय | देवाभ्याम् | देवेभ्यः |
| पञ्चमी | से/पर से | from | देवात् | देवभ्याम् | देवेभ्यः |
| षष्ठी | का/की/के/रा/री/रे | ‘s, of | देवस्य | देवयोः | देवानाम् |
| सप्तमी | में/पर/उपर | in, on, above | देवे | देवयोः | देवेषु |
| सम्बोधन | हे/अरे/भो | oh alas | हे देव ! | हे देवौ | हे देवाः |

| विभक्तिः | | | अ कारान्तः नपु वन शब्दः | | |
|---|---|---|---|---|---|
| प्रथमा | ने | Subject | वनम् | वने | वनानि |
| द्वितीया | को | Object/to | वनम् | वने | वनानि |
| तृतीया | से/केद्वारा | by, with | वनेन | वनाभ्याम् | वनैः |
| चतुर्थी | को/के लिए | to, for | वनाय | वनाभ्याम् | वनेभ्यः |
| पञ्चमी | से/पर से | from | वनात् | वनाभ्याम् | वनेभ्यः |
| षष्ठी | का/की/के/रा/री/रे | ‘s, of | वनस्य | वनयोः | वनानाम् |
| सप्तमी | में/पर/उपर | in, on, above | वने | वनयोः | वनेषु |
| सम्बोधन | हे/अरे/भो | oh alas | हे वन ! | हे वने ! | हे वनानि ! |

WWW.BHAVINPATHAK.WEBS.COM

| विभक्तिः | | | अ कारान्तः स्त्री माला शब्दः | | |
|---|---|---|---|---|---|
| प्रथमा | ने | Subject | माला | माले | मालाः |
| द्वितीया | को | Object/to | मालाम् | माले | मालाः |
| तृतीया | से/केद्वारा | by, with | मालया | मालाभ्याम् | मालाभिः |
| चतुर्थी | को/के लिए | to, for | मालायै | मालाभ्याम् | मालाभ्यः |
| पञ्चमी | से/पर से | from | मालायाः | मालाभ्याम् | मालाभ्यः |
| षष्ठी | का/की/के/रा/री/रे | ‘s, of | मालायाः | मालयोः | मालानाम् |
| सप्तमी | में/पर/उपर | in, on, above | मालायाम् | मालयोः | मालासु |
| सम्बोधन | हे/अरे/भो | oh alas | हे माले ! | हे माले ! | हे मालाः ! |

| विभक्तिः | | | ई कारान्तः स्त्री देवी शब्दः | | |
|---|---|---|---|---|---|
| प्रथमा | ने | Subject | देवी | देव्यौ | देव्यः |
| द्वितीया | को | Object/to | देवीम् | देव्यौ | देवीः |
| तृतीया | से/केद्वारा | by, with | देव्या | देवीभ्याम् | देवीभिः |
| चतुर्थी | को/के लिए | to, for | देव्यै | देवीभ्याम् | देवीभ्यः |
| पञ्चमी | से/पर से | from | देव्याः | देवीभ्याम् | देवीभ्यः |
| षष्ठी | का/की/के/रा/री/रे | ‘s, of | देव्याः | देव्योः | देवीनाम् |
| सप्तमी | में/पर/उपर | in, on, above | देव्याम् | देव्योः | देवीषु |
| सम्बोधन | हे/अरे/भो | oh alas | हे देवि ! | हे देव्यौ | हे देव्यः |

| विभक्तिः | | | अस्मद् – सर्वनाम | | |
|---|---|---|---|---|---|
| प्रथमा | ने | Subject | अहम् | आवाम् | वयम् |
| द्वितीया | को | Object/to | माम्/मा | आवाम्/नौ | अस्मान्/नः |
| तृतीया | से/केद्वारा | by, with | मया | आवाभ्याम् | अस्माभिः |
| चतुर्थी | को/के लिए | to, for | मह्यम्/मे | आवाभ्याम्/नौ | अस्मभ्यम्/नः |
| पञ्चमी | से/पर से | from | मत् | आवाभ्याम् | अस्मत् |
| षष्ठी | का/की/के/रा/री/रे | 's, of | मम/मे | आवयोः/नौ | अस्माकम्/नः |
| सप्तमी | में/पर/उपर | in, on, above | मयि | आवयोः | अस्मासु |
| सम्बोधन | हे/अरे/भो | oh alas | – | – | – |

| विभक्तिः | | | युष्मद् – सर्वनाम | | |
|---|---|---|---|---|---|
| प्रथमा | ने | Subject | त्वम् | युवाम् | यूयम् |
| द्वितीया | को | Object/to | त्वाम्/त्वा | युवाम्/वाम् | युष्मान्/वः |
| तृतीया | से/केद्वारा | by, with | त्वया | युवाभ्याम् | युष्माभिः |
| चतुर्थी | को/के लिए | to, for | तुभ्यम्/ते | युवाभ्याम्/वाम् | युष्मभ्यम्/वः |
| पञ्चमी | से/पर से | from | त्वत | युवाभ्याम् | युष्मत् |
| षष्ठी | का/की/के/रा/री/रे | ‘s, of | तव/ते | युवयोः/वाम् | युष्माकम्/वः |
| सप्तमी | में/पर/उपर | in, on, above | त्वयि | युवयोः | युष्मासु |
| सम्बोधन | हे/अरे/भो | oh alas | – | – | – |

| कारकम् | विभक्तिः | कारकविभक्तिः | | उपपदविभक्तिः |
|---|---|---|---|---|
| कर्ता | प्रथमा | ने | Subject | |
| कर्म | द्वितीया | को | Object/to | विना, परितः, उभयतः, समया, प्रति |
| करणम् | तृतीया | से/केद्वारा | by, with | सह, विना, अलम्, साकम्, सार्धम् |
| सम्प्रदानम् | चतुर्थी | को/के लिए | to, for | नमः, रुच्, कुप्, दा, |
| अपादानम् | पञ्चमी | से/पर से | from | भी, विना, बहिः, रक्ष, त्रा |
| *(सम्बन्धः)* | षष्ठी | का/की/के/<br>रा/री/रे | ‘s, of | पुरतः, पृष्ठतः, उपरि, अधः |
| अधिकरणम् | सप्तमी | में/पर/उपर | in, on,<br>above | कुशल, प्रवीण, स्निह्, विश्वस् |
| *(सम्बोधनम्)* | सम्बोधन | हे/अरे/भो | oh alas | |

WWW.BHAVINPATHAK.WEBS.COM

| मेरा | मित्र | सुबह में | बस से | विवेक के साथ | पढने के लिए | घर से | विद्यालय | जाता है |
|---|---|---|---|---|---|---|---|---|
| ६ | १ | ७ | ३ | ३ | ४ | ५ | २ | क्रिया |
| मम | मित्रं | प्रात:काले | यानेन | विवेकेन सह | पठनाय | गृहात् | विद्यालयं | गच्छति |
| | | प्रभाते | | | | | | |

| हिन्दी वाक्य | संस्कृत अनुवाद |
| --- | --- |
| मेरे मित्र ने पुस्तक पढ़ी। | मम मित्रं पुस्तकम् अपठत्। |
| वे लोग घर पर क्या करेंगे। | ते गृहे किं करिष्यन्ति ? |
| यह गाय का दूध पीता है। | सः गोदुग्धं पिबति। |
| हम लोग विद्यालय जाते है। | वयं विद्यालयं गच्छाम:। |
| तुम शीघ्र घर जाओ। | त्वं शीघ्रं गृहं गच्छ। |
| हमें मित्रों की सहायता करनी चाहिये। | वयं मित्राणां सहायतां कुर्याम। |
| विवेक आज घर जायेगा। | विवेकः अद्य गृहं गमिष्यति। |
| सदाचार से विश्वास बढता है। | सदाचारेण विश्वासः वर्धते। |
| हम दोनों ने आज चलचित्र देखा। | आवाम् अद्य चलचित्रम् अपश्याव। |
| हम दोनों कक्षा में अपना पाठ पढ़ेंगे \| | आवां कक्षायां स्वपाठं पठिष्याव:। |
| वह घर गई। | सा गृहम् अगच्छत्। |
| सन्तोष उत्तम सुख है। | संतोषः उत्तमं सुखम् अस्ति। |
| पेड़ से पत्ते गिरते है। | वृक्षात् पत्राणि पतन्ति। |
| मै वाराणसी जाऊंगा। | अहं वाराणासीं गमिष्यामि। |
| मुझे घर जाना चाहिये। | अहं गृहं गच्छेयम्। |
| यह राम की किताब है। | इदं रामस्य पुस्तकम् अस्ति। |
| हम सब पढ़ते हैं। | वयं पठामः। |
| जगन्नाथ मंदिर पुरी में है। | जगन्नाथमन्दिरं पुर्याम् अस्ति। |
| सभी छात्र पत्र लिखेंगे। | सर्वे छात्राः पत्रं लिखिष्यन्ति। |
| मै विद्यालय जाऊंगा। | अहं विद्यालयं गमिष्यामि। |
| प्रयाग में गंगा -यमुना का संगम है \| | प्रयागे गंगायमुनयो: संगम: अस्ति \| |
| हम सब भारत के नागरिक हैं \| | वयं भारतस्य नागरिका: सन्ति \| |
| वाराणसी गंगा के पावन तट पर स्थित है \| | वाराणसी गंगाया: पावनतटे स्थित: अस्ति \| |
| वह गया \| | स: आगच्छत् \| |
| वह किसका घोड़ा है ? | स: कस्य अश्व: अस्ति ? |
| तुम पुस्तक पढ़ो \| | त्वं पुस्तकं पठ \| |
| हम सब भारत के नागरिक हैं \| | वयं भारतस्य नागरिका: सन्ति \| |

| | |
|---|---|
| देशभक्त निर्भीक होते हैं | | देशभक्ता: निर्भीका: भवन्ति | |
| सिकन्दर कौन था ? | अलक्षेन्द्र: क: आसीत् ? |
| राम स्वभाव से दयालु हैं | | राम: स्वभावेन दयालु: अस्ति | |
| वृक्ष से फल गिरते हैं | | वृक्षात् फलानि पतन्ति | |
| शिष्य ने गुरु से प्रश्न किया | | शिष्य: गुरुं प्रश्नम् अपृच्छत् | |
| मैं प्रतिदिन स्नान करता हूँ | | अहं प्रतिदिनम् स्नानं कुर्यामि | |
| मैं कल दिल्ली जाऊँगा | | अहं श्व: दिल्लीनगरं गमिष्यामि | |
| प्रयाग में गंगा-यमुना का संगम है | | प्रयागे गंगायमुनयो: संगम: अस्ति | |
| वाराणसी की पत्थर की मूर्तियाँ प्रसिद्ध हैं | | वाराणस्या: प्रस्तरमूर्त्तय: प्रसिद्धा: | |
| अगणित पर्यटक दूर देशो से वाराणसी आते हैं | | अगणिता: पर्यटका: सुदूरेभ्य: देशेभ्य: वाराणसी नगरिम् आगच्छन्ति | |
| यह नगरी विविध कलाओ के लिए प्रसिद्ध हैं | | इयं नगरी विविधानां कलानां कृते प्रसिद्धा अस्ति | |
| वे यहा नि:शुल्क विद्या ग्रहण करते हैं | | ते अत्र नि:शुल्कं विद्यां गृह्णन्ति | |
| वाराणसी में मरना मंगलमय होता है | | वाराणस्यां मरणं मंगलमयं भवति | |
| सूर्य उदित होगा और कमल खिलेंगे | | सूर्य: उदेष्यति कमलानि च हसिष्यन्ति | |
| रात बीतेगी और सवेरा होगा | | रात्रि: गमिष्यति, भविष्यति सुप्रभातम् | |
| कुँआ सोचता है कि हैं अत्यन्त नीच हूँ | | कूप: चिन्तयति नितरां नीचोsस्मीति | |
| भिक्षुक प्रत्येक व्यक्ति के सामने दीन वचन मत कहो | | भिक्षुक! प्रत्येकं प्रति दिन वच: न वद्तु | |
| हंस नीर- क्षीर विवेक में प्रख्यात हैं | | हंस: नीर-क्षीर विवेक प्रसिद्ध अस्ति | |
| सत्य से आत्मशक्ति बढ़ती है | | सत्येन आत्मशक्ति: वर्धते | |
| अपवित्रता से दरिद्रता बढ़ती है | | अशौचेन दारिद्रयं वर्धते| |
| अभ्यास से निपुणता बढ़ती है| | अभ्यासेन निपुणता वर्धते | |
| उदारता से अधिकतर बढ़ते है | | औदार्येण प्रभुत्वं वर्धते | |
| उपेक्षा से शत्रुता बढ़ती है | | उपेक्षया शत्रुता वर्धते| |
| मानव जीवन को संस्कारित करना ही संस्कृति है | | मानव जीवनस्य संस्करणाम् एव संस्कृति: अस्ति |
| भारतीय संस्कृति सर्वश्रेष्ठ है | | भारतीया: संस्कृति: सर्वश्रेष्ठ: अस्ति | |

| | |
|---|---|
| सभी निरोग रहें और कल्याण प्राप्त करें | | सर्वे संतु निरामया: सर्वे भद्राणि पश्यंतु च | |
| काम करके ही फल मिलता है | | कर्म कृत्वा एव फलं प्राप्यति | |
| हमारे पूर्वज धन्य थे | | अस्माकं पूर्वजा: धन्या: आसन्| |
| हम सब एक ही संस्कृति के उपासक हैं| | वयं सर्वेऽपि एकस्या: संस्कृते: समुपासका: सन्ति | |
| जन्म भूमि स्वर्ग से भी बड़ी है | | जन्मभूमि स्वर्गादपि गरीयसी| |
| विदेश में धन मित्र होता है| | विदेशेषु धनं मित्रं भवति | |
| विद्या सब धनों में प्रधान है | | विद्या सर्व धनं प्रधानम् | |
| मनुष्य को निर्लोभी होना चाहिये | | मनुष्य: लोभहीन: भवेत्| |
| आज मेरे विद्यालय मे उत्सव होगा| | अद्य मम् विद्यालये उत्सव: भविष्यति | |
| ताजमहल यमुना किनारे पर स्थित है | | ताजमहल: यमुना तटे स्थित: अस्ति | |
| हमे नित्य भ्रमण करना चाहिये | | वयं नित्यं भ्रमेम | |
| गाय का दूध गुणकारी होता है | | धेनो: दुग्धं गुणकारी भवति | |
| जंगल मे मोर नाच रहे हैं | | वने मयूरा: नृत्यन्ति | |
| किसी के साथ बुरा कार्य मत करो | | केनापि सह दुष्कृतं मा कुरु| |
| सच और मीठा बोलो | | सत्यं मधुरं च वद | |

## पाठः - ३ गोदोहनम्

एतत् नाट्यांशं 'चतुर्व्यूहम्' इति पुस्तकात् संक्षिप्य सम्पाद्य च उद्धृतम्। अस्मिन् नाटके एतादृशस्य जनस्य कथानकम् अस्ति। यः घनवान् सुखाकाखी च भवितुम् इच्छुकः मासपर्यन्तं दुग्धदोहनादेव विरमति, येन मासान्ते धेनोः शरीरे सञ्चितं पर्याप्तं दुग्धम् एकवारमेव विक्रीय सम्पत्तिमर्जयितुं समर्थः भवेत्। परं मासान्ते यदा सः दुग्धदोहनाय प्रयतते तदा सः दुग्धबिन्दुम् अपि न प्राप्नोति। दुग्धप्राप्तिस्थाने सः धेनोः प्रहारैः रक्तरञ्जितः भवति, अवगच्छति च यत् दैनन्दिनं कार्यं यदि मासपर्यन्तं संगृह्य क्रियते तदा लाभस्य स्थाने हानिरेव भवति

### (प्रथमं दृश्यम्)

(मल्लिका मोदकनि रचयन्ती मन्दस्वरेण मन्दस्वरेण शिवस्तुतिं करोति।)

(ततः प्रविशति मोदकगन्धम् अनुभवन् प्रसन्नमना चन्दनः)

चन्दनः - अहा! सुगन्धस्तु मनोहरः (विलोक्य) अये मोदकानि रच्यन्ते? (प्रसन्नः भूत्वा) आस्वादयामि तावत्। (मोदकं ग्रहीतुमिच्छति)

मल्लिका - (सक्रोधम्) विरम। विरम। मा स्पृश! एतानि मोदकानि।

चन्दनः - किमर्थं क्रुध्यसि! तव हस्तनिर्मितानि मोदकानि दृष्ट्वा अहं जिह्वालोलुपतां नियन्त्रयितुम् अक्षमः अस्मि, किं न जानासि त्वमिदम्?

मल्लिका - सम्यग् जनामि नाथ! परम् एतानि मोदकानि पूजानिमित्तानि सन्ति।

चन्दनः - तर्हि, शीघ्रमेव पूजनं सम्पादय। प्रसादं च देहि।

मल्लिका - भो! अत्र पूजनं न भविष्यति। अहं स्वसखिभिः सह श्वः प्रातः काशीविश्वनाथमन्दिरं प्रति गमिष्यामि, तत्र गङ्गास्नानं धर्मयात्राञ्च वयं करिष्यामः।

चन्दनः - सखिभिः सह ! न मया सह! (विषादं नाटयति।)

मल्लिका - आम् । चम्पा, गौरी, माया, मोहिनी, कपिलाद्याः सर्वाः गच्छन्ति। अतः मया सह तवागमनस्य औचित्यं नास्ति। वयं सप्ताहान्ते प्रत्यागमिष्यामः। तावत्, गृहव्यवस्थां धेनोः दुग्धदोहनव्यवस्थाञ्च परिपालय।

### (द्वितीयं दृश्यम्)

चन्दनः - अस्तु। गच्छ। सखिभिः सह धर्मयात्रया आनन्दिता भव। अहं सर्वमपि परिपालयिष्यामि। शिवास्ते सन्तु पन्थानः।

चन्दनः - मल्लिका तु धर्मयात्रायै गता। अस्तु। दुग्धदोहनं कृत्वा ततः स्वप्रातराशस्य प्रबन्धं करिष्यामि। (स्त्रीवेषं धृत्वा, दुग्धपात्रहस्तः नन्दिन्याः समीपं गच्छति।

उमा - मातुलानि! मातुलानि!

चन्दनः - उमे! अहं तु मातुलः। तव मातुलानि तु गङ्गास्नानार्थं काशीं तता अस्ति। कथय! किं ते प्रियं करवाणि?

उमा - मातुल! पितामहः कथयति, मासानन्तरं अस्मत् गृहे महोत्सवः भविष्यति। तत्र त्रिशत-सेटकमितं दुग्धम् अपेक्षते। एषा व्यवस्था भवद्भिः करणीया ।

चन्दनः - (प्रसन्नमनसा) त्रिशत-सेटकपरिमितं दुग्धम्। शोभनम्! दुग्धव्यवस्था भविष्यति एव इति पितामहं प्रति त्वया वक्तव्यम्।

उमा - धन्यवादः मातुल! याम्युधुना! (सा निर्गता)

### (तृतीयं दृश्यम्)

चन्दनः - (प्रसन्नो भूत्वा, अङ्गुलिषु गणयन्) अहो! सेटक-त्रिशतकानि पयांसि! अनेन तु बहुधनं लप्स्यसे। (नन्दिनीं दृष्ट्वा) भो नन्दिनि! तव कृपया तु अहं धनिकः भविष्यामि। (प्रसन्नः सः धेनोः बहुसेवां करोति)

चन्दनः - (चिन्तयति) मासान्ते एव दुग्धस्य आवश्यकता भवति। यदि प्रतिदिनं दोहनं करोमि तर्हि दुग्धं सुरक्षितं न तिष्ठति। इदानीं किं करवाणि? भवतु नाम मासान्ते एव सम्पूर्णतया दुग्धदोहनं करोमि।

(एवं प्रकारेण सप्तदिनानि व्यतितानि। सप्ताहान्ते मल्लिका प्रत्यागच्छति)

मल्लिका - (प्रविश्य) स्वामिन्! प्रत्यागता अहम्। आस्वादय प्रसादम्।

चन्दनः - मल्लिके! तव यात्रा तु सम्यक् सफला जाता? काशीविश्वनाथस्य कृपया प्रियं निवेदयामि।

मल्लिका - (साश्चर्यम्) एवम्। धर्मयात्रातिरिक्तं प्रियतरं किम्?

चन्दनः - ग्रामप्रमुखस्य गृहे महोत्सवः मासान्ते भविष्यति। तत्र त्रिशत-सेटकमितं दुग्धम् अस्माभिः दातव्यम् अस्ति।

मल्लिका - किन्तु एतान्मात्रं दुग्धं कुतः प्राप्स्यामः।

चन्दनः - विचारय मल्लिके! प्रतिदिनं दोहनं कृत्वा दुग्धं स्थापयामः चेत् तत् सुरक्षितं न तिष्ठति। अत एव दुग्धदोहनं न क्रियते। उत्सवदिने एव समग्रं दुग्धं धोक्ष्यावः।

मल्लिका - स्वामिन्! त्वं तु चतुरतमः। अत्युत्तमः विचारः। अधुना दुग्धदोहनं विहाय केवलं नन्दिन्याः सेवाम् एव करिष्यावः। अनेन अधिकाधिकं दुग्धं मासान्ते प्राप्स्यावः।

(द्वावेव धेनोः सेवायां निरतौ भवतः। अस्मिन् क्रमे घासादिकं गुडादिकं च भोजयतः। कदाचित् विषाणयोः तैलं लेपयतः तिलकं धारयतः रात्रौ नीराजनेनापि तोषयतः)

चन्दनः - मल्लिके! आगच्छ! कुम्भकारं प्रति चलावः। दुग्धार्थं पात्रबन्धोऽपि करणीयः। (द्वावेव निर्गतौ)

(चतुर्थं दृश्यम्)

कुम्भकारः - (घटरचनायां लीनः गायति)

ज्ञात्वाऽपि जीविकाहेतोः रचयामि घटानहम्।
जीवनं भङ्गुरं सर्वं यथैष मृत्तिकाघटः॥

चन्दनः - नमस्करोमि तात! पञ्चदश घटान् इच्छामि। किं दास्यसि?

देवेशः - कथं न? विक्रयणाय एव एते। गृहाण घटान्। पञ्चशतोत्तर-रूप्यकाणि।

चन्दनः - साधु। परं मूल्यं तु दुग्धं विक्रीय एव दातुं शक्यते।

देवेशः - क्षम्यतां पुत्र! मूल्यं विना तु एकमपि घटं न दास्यामि।

मल्लिका - (स्वाभूषणं दातुमिच्छति) तात! यदि अधुनैव मूल्यम् आवश्यकं तर्हि, गृहाण एतत् आभूषणम्।

देवेशः - पुत्रिके! नाहं पापक्रमं करोमि। कथमपि नेच्छामि त्वाम् आभूषणविहीनां कर्तुम्। नयतु यथाभिलषितान् घटान्। दुग्धं विक्रीय एव घटमूल्यं ददातु।

उभौ - धन्योऽसि तात! धन्योऽसि।

(पञ्चमं दृश्यम्)

(मासानन्तरं सन्ध्याकालः। एकत्र रिक्ताः नूतनघटाः सन्ति। दुग्धक्रेतारः अन्ये च गामवासिनः अपरत्र आसीनाः)

चन्दनः - (धेनुं प्रणम्य, मङ्गलाचरणं विधाय, मल्लिकाम् आह्वयति) मल्लिके! सत्वरम् आगच्छ।

मल्लिका - आयामि नाथ! दोहनम् आरभस्व तावत्।

चन्दनः - (यदा धेनोः समीपं गत्वा दोग्धुम् इच्छति, तदा धेनुः पृष्ठपादेन प्रहरति। चन्दनश्च पात्रेण सह पतति। नन्दिनि! दुग्धं देहि। किं जातं ते? (पुनः प्रयासं करोति) (नन्दिनी च पुनः पुनः पादप्रहारेण ताडयित्वा चन्दनं रक्तरञ्जितं करोति।) हा! हतोऽस्मि। (चीत्कारं कुर्वन् पतति) (सर्वे आश्चर्येण चन्दनम् अन्योन्यं च पश्यन्ति।)

मल्लिका - (चीत्कारं श्रुत्वा, झटिति प्रविश्य) नाथ! किं जातम्? कथं त्वं रक्तरञ्जितः?

चन्दनः - धेनुः दोग्धुम् अनुमतिम् एव न ददाति। दोहनप्रक्रियाम् आरभमाणम् एव ताडयति माम्।

(मल्लिका धेनुं स्नेहेन वात्सल्येन च आकार्य दोग्धुं प्रयतते। किन्तु, धेनुः दुग्धहीना एव इति अवगच्छति)

मल्लिका - (चन्दनं प्रति) नाथ! अत्यनुचितं कृतम् आवाभ्यां यत् मासपर्यन्तं धेनोः दोहनं न कृतम्। सा पीडाम् अनुभवति अत एव ताडयति।

चन्दनः - देवि! मयापि ज्ञातं यत्, अस्माभिः सर्वथा अनुचितमेव कृतं यत्, पूर्णमासपर्यन्तं दोहनं न कृतम्। अत एव, दुग्धं शुष्कं जातम्। सत्यमेव उक्तम्-

कार्यमद्यतनीयं यत् तदद्यैव विधीयताम्।
विपरीते गतिर्यस्य स कष्टं लभते ध्रुवम्॥

मल्लिका - आम् भर्तः! सत्यमेव मयापि पठितं यत्-

सुविचार्य विधातव्यं कार्यं कल्याणकाङ्क्षिणा।
यः करोत्यविचार्यैतत् स विषीदति मानवः॥

किन्तु प्रत्यक्षतया अद्य एव अनुभूतम् एतत्।

सर्वे - दिनस्य कार्यं तस्मिन्नेव दिने कर्तव्यम्। यः एवं न करोति सः कष्टं लभते ध्रुवम्।

(जवनिका पत्तनम्)

(सर्वे मिलित्वा गायन्ति)

आदानस्य प्रदानस्य कर्तव्यस्य च कर्मणः।
क्षिप्रक्रियमाणस्य कालः पिबति तद्रसम्॥

# स्वाध्यायः

- एकपदेन उत्तरं लिखत-

| | | |
|---|---|---|
| क) | मल्लिका पूजार्थं सखीभिः सह कुत्र गच्छति स्म ? | काशीविश्वनाथमन्दिरम् |
| ख) | उमायाः पितामहेन कति सेटकमितं दुग्धम् अपेक्ष्यते स्म? | त्रिशतम् |
| ग) | कुम्भकारः घटान् किमर्थं रचयति? | जीविकाहेतोः |
| घ) | कानि चन्दनस्य जिह्वालोलुपतां वर्धन्ते स्म? | मोदकानि |
| ङ) | नन्दिन्याः पादप्रहारैः कः रक्तरञ्जितः अभवत्? | चन्दनः |

- पूर्णवाक्येन उत्तरत-

क) मल्लिका चन्दनश्च मासपर्यन्तं धेनोः कथं सेवाम् अकुरुताम् ?
मल्लिका चन्दनः च धेनुं घासादिकं घासादिकं गुडादिकं च भोजयतः। कदाचित् विषाणयोः तैलं लेपयतः तिलकं धारयतः रात्रौ नीराजनेनापि तोषयतः ।

ख) कालः कस्य रसं पिबति?
कालः क्षिप्रम् अक्रियमाणस्य आदानस्य प्रदानस्य कर्तव्यस्य कर्मणः च तत् रसं पिबति।

ग) घटमूल्यार्थं यदा मल्लिका स्वाभूषणं दातुं प्रयतते तदा कुम्भकारः किं वदति?
घटमूल्यार्थं यदा मल्लिका स्वाभूषणं दातुं प्रयतते तदा कुम्भकारः वदति – " पुत्रिके !..... घटमूल्यं ददातु।" इति

घ) मल्लिकया किं दृष्ट्वा धेनोः ताडनस्य वास्तविकं कारणं ज्ञातम्?
मल्लिकया धेनोः दुग्धहीनतां दृष्ट्वा ताडनस्य ……..।

ङ) मासपर्यन्तं धेनोः अदोहनस्य किं कारणम् आसीत् ?
मासपर्यन्तं धेनोः अदोहनस्य कारणम् आसीत् यत् ग्रामप्रमुखः त्रिशत सेटकमितं दुग्धम् इच्छति स्म अतः चन्दनः उत्सवदिने एव सम्पूर्णं दुग्धं प्राप्तुं इष्टवान् । / चन्दनस्यस्य दुग्धं प्रदाय धनं प्राप्तुं लोभः आसीत्।

- स्थूलपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत-

| | | |
|---|---|---|
| क) | मल्लिका **सखीभिः** सह धर्मयात्रायै गच्छति स्म । | काभिः |
| ख) | चन्दनः दुग्धदोहनं कृत्वा एव **स्वप्रातराशस्य** प्रबन्धम् अकरोत्। | कस्य |
| ग) | **मोदकानि** पूजानिमित्तानि रचितानि आसन्। | कानि |
| घ) | मल्लिका स्वपतिं **चतुरतमं** मन्यते। | कीदृशं ( स्वपतिः कीदृशः, स्वपतिना कीदृशेन) |
| ङ) | **नन्दिनी** पादाभ्यां ताडयित्वा चन्दनं रक्तरञ्जितं करोति। | का |

- मञ्जूषायाः सहायतया भावार्थे रिक्तस्थानानि पूरयत-

**(गृहव्यवस्थायै, उत्पादयेत्, समर्थकः, धर्मयात्रायाः, मङ्गलकामनाम्, कल्याणकारिणः)**

यदा चन्दनः स्वपत्न्याः काशीविश्वनाथं प्रति **धर्मयात्रायाः** विषये जानाति तदा सः क्रोधितः न भवति यत् तस्याः पत्नी तं **गृहव्यवस्थायै** कथयित्वा सखीभिः सह भ्रमणाय गच्छति अपि तु तस्याः यात्रायाः कृते **मङ्गलकामनां** कुर्वन् कथयति यत्तव मार्गाः शिवाः अर्थात् **कल्याणकारिणः** भवन्तु। मार्गे काचिदपि बाधा तव कृते समस्यां न **उत्पादयेत्** । एतेन सिध्यति यत् चन्दनः नारीस्वतन्त्रतायाः **समर्थकः** आसीत्।

- घटनाक्रमानुसारं लिखत।

| | |
|---|---|
| १ | क) मल्लिका पूजार्थं मोदकानि रचयति। |
| २ | ख) सा सखीभिः सह तीर्थयात्रायै काशीविश्वनाथमन्दिरं प्रति गच्छति। |
| ३ | ग) उमा मासान्ते उत्सवार्थं दुग्धस्य आवश्यकताविषये चन्दनं सूचयति। |
| ४ | घ) चन्दनः उत्सवसमये अधिकं दुग्धं प्राप्तुं मासपर्यन्तं दोहनं न करोति। |
| ५ | ङ) चन्दनस्य पत्नी तीर्थयात्रां समाप्य गृहं प्रत्यागच्छति। |
| ६ | च) उभौ नन्दिन्याः सर्वविधपरिचयां कुरुतः। |
| ७ | छ) उत्सवदिने यदा दोग्धुं प्रयत्नं करोति तदा नन्दिनी पादेन प्रहरति। |
| ८ | ज) कार्याणि समये करणीयानि इति चन्दनः नन्दिन्याः पादप्रहारेण अवगच्छति। |

# चतुर्थीविभक्तिः

रुच् , दा(यच्छ्)

नमः, कुप्

| चतुर्थी वि० | | एकवचनम् | द्विवचनम् | बहुवचनम् | अन्य-उदाहरणानि |
|---|---|---|---|---|---|
| अ-पुं | देव | देवाय | देवाभ्याम् | देवेभ्यः | हस्त, स्यूत, प्रकोष्ठ, बालक, ग्राम |
| अ-नपुं | वन | वनाय | वनाभ्याम् | वनेभ्यः | गृह, मुख, उद्यान, नगर, क्षेत्र, सस्य |
| इ-पुं | कवि | कवये | कविभ्याम् | कविभ्यः | अग्नि, निधि, राशि, हरि, ध्वनि, हरि |
| उ-पुं | गुरु | गुरवे | गुरुभ्याम् | गुरुभ्यः | वटु, तरु, बाहु, तन्तु, इक्षु, शिशु |
| ऋ-पुं | नेतृ | नेत्रे | नेतृभ्याम् | नेतृभ्यः | कर्तृ, नेतृ, अध्येतृ, वक्तृ, श्रोतृ, पितृ |
| उ-नपुं | वस्तु | वस्तुने | वस्तुभ्याम् | वस्तुभ्यः | अश्रु, श्मश्रु, मधु |

| चतुर्थी वि० | | एकवचनम् | द्विवचनम् | बहुवचनम् | अन्य-उदाहरणानि |
|---|---|---|---|---|---|
| आ-स्त्री | माला | मालायै | मालाभ्याम् | मालाभ्यः | पत्रिका, लता, बाला, शाला, |
| इ-स्त्री | मति | मत्यै/मतये | मतिभ्याम् | मतिभ्यः | व्यक्ति, पङ्क्ति, कृति, तिथि |
| ई-स्त्री | देवी | देव्यै | देवीभ्याम् | देवीभ्यः | जननी, घटी, लेखनी, वीथी |
| ऋ-स्त्री | मातृ | मात्रे | मातृभ्याम् | मातृभ्यः | दुहितृ, स्वसृ, ननादृ |
| उ-स्त्री | धेनु | धेन्वै/धेनवे | धेनुभ्याम् | धेनुभ्यः | चञ्चु, रज्जु, |
| ऊ-स्त्री | वधू | वध्वै | वधूभ्याम् | वधूभ्यः | |

| सर्वनामरूपाणि | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| एतत् | पुं/नपुं | एतस्मै | एताभ्याम् | एतेभ्यः |
| | स्त्री | एतस्यै | एताभ्याम् | एताभ्यः |
| तत् | पुं/नपुं | तस्मै | ताभ्याम् | तेभ्यः |
| | स्त्री | तस्यै | ताभ्याम् | ताभ्यः |
| किम् | पुं/नपुं | कस्मै | काभ्याम् | केभ्यः |
| | स्त्री | कस्यै | काभ्याम् | काभ्यः |

| सर्वनामरूपाणि | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| भवत् | पुं | भवते | भवद्भ्याम् | भवद्भ्यः |
| | स्त्री | भवत्यै | भवतीभ्याम् | भवतीभ्यः |
| सर्व | पुं/नपुं | सर्वस्मै | सर्वाभ्याम् | सर्वेभ्यः |
| सर्वा | स्त्री | सर्वस्यै | सर्वाभ्याम् | सर्वाभ्यः |
| अस्मद् | | मह्यम् /मे | आवाभ्याम् / नौ | अस्मभ्यम् / नः |
| युष्मद् | | तुभ्यम् / ते | युवाभ्याम् / वाम् | युष्मभ्यम् / वः |



रामः पवनपुत्राय मुद्रिकां ददाति । (पवनपुत्रः)



कर्णः ब्राह्मणाय कवचं ददाति । (ब्राह्मणः)

| | | | |
|---|---|---|---|
| | गोपालाय | मधुरम् | |
| | शिक्षकाय | सुधाखण्डः | |
| रमेशः | वैद्याय | धनम् | ददाति |
| अहम् | सुरेशाय | आभरणम् | ददामि |
| | सुनीलाय | कन्दुकम् | |
| | प्रशान्ताय | उपनेत्रम् | |



आञ्जनेयः सीतायै अङ्गुलीयकं ददाति । (सीता)



पिता पुत्र्यै उपायनं ददाति । (पुत्री)

| | | | |
|---|---|---|---|
| | सीतायै | मधुरम् | |
| | शिक्षिकायै | सुधाखण्डः | |
| रमेशः | वैद्यायै | धनम् | ददाति |
| अहम् | नर्तक्यै | आभरणम् | ददामि |
| | गीतायै | कन्दुकम् | |
| | सुशीलायै | उपनेत्रम् | |

# पश्यन्तु पठन्तु च


ग्राहकः
आपणिकः
ग्राहकः आपणिकाय धनं ददाति
छात्रा
शिक्षिका
छात्रा शिक्षिकायै पुष्पं ददाति
पत्रवाहकः
गृहिणी
पत्रवाहकः गृहिण्यै पत्रं ददाति

# उच्चैः पठन्तु जानन्तु च

- धनिकः मित्राय उपायनं ददाति ।
- माता पुत्राय पायसं ददाति ।
- नेता कृषकाय क्षेत्रं ददाति ।
- जनाः भिक्षुकाय नाणकं ददति ।
- युवकः वृद्धायै उपनेत्रं ददाति ।
- सखी महिलायै छत्रं ददाति ।
- वैद्यः रुग्णायै औषधं यच्छति ।
- अग्रजः भगिन्यै वस्त्रं ददाति ।
- पितामहः जनन्यै आशिषं ददाति ।
- पतिः पत्न्यै आभूषणं यच्छति ।

3. कोष्ठकस्य साहाय्येन राष्ट्रपतिः केभ्यः पुरस्कारं ददाति इति लिखन्तु -

| | | | | | | |
|---|---|---|---|---|---|---|
| वैज्ञानिकः | पण्डितः | बालिका | गायिका | नर्तकी | कवयित्री | मित्रम् |
| वैज्ञानिकाः | पण्डिताः | बालिकाः | गायिकाः | नर्तक्यः | कवयित्र्यः | मित्राणि |

उदा - राष्ट्रपतिः वैज्ञानिकाय पुरस्कारं ददाति । राष्ट्रपतिः वैज्ञानिकेभ्यः पुरस्कारं ददाति ।

१. राष्ट्रपतिः .......... पुरस्कारं ददाति । .......... ........ पुरस्कारं ददाति ।

२. .......... .......... पुरस्कारं ददाति । .......... ........ पुरस्कारं ददाति ।

३. .......... .......... पुरस्कारं ददाति । .......... ......... पुरस्कारं ददाति ।

४. .......... .......... पुरस्कारं ददाति । ......... .......... पुरस्कारं ददाति ।

५. .......... .......... पुरस्कारं ददाति । ......... ......... पुरस्कारं ददाति ।

६. .......... ......... पुरस्कारं ददाति । ......... ......... पुरस्कारं ददाति ।

# विशेषप्रयोगः – नमः योगे चतुर्थी

'नमः' इति शब्दस्य योगः यत्र तस्य शब्दस्य चतुर्थीविभक्तिः भवति ।

यथा – शिवाय नमः । सीतायै नमः । लक्ष्म्यै नमः । विष्णवे नमः ।

(विशेषः – 'नमस्करोमि' इति क्रियापदस्य प्रयोगसन्दर्भे द्वितीयाविभक्तेः प्रयोगः करणीयः ।

यथा – अहं शिक्षकं नमस्करोमि ।)

## उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु –

उदा – (कविः) कवये नमः ।

१. (अतिथिः) ........................ ।

२. (महोदयः) ........................ ।

३. (गुरुः) ........................ ।

४. (सरस्वती) ........................ ।

५. (जन्मभूमिः) ........................ ।

६. (भवान्) ........................ ।

७. (धेनुः) ........................ ।

८. (शारदा) ........................ ।

९. (कुलपतिः) ........................ ।

१०. (माता) ........................ ।

# विशेषप्रयोगः – रोचतेः प्रयोगे चतुर्थी



बालकाय मधुरं रोचते ।

गीतायै नाटकं रोचते ।

मनोजाय उपन्यासः रोचते ।

- रोचते इत्यस्य प्रयोगे यस्मै रोचते तस्य चतुर्थीविभक्तिः भवति ।
- विशेषः - यत् रोचते तस्य तु प्रथमाविभक्तिः एव ।

# विशेषप्रयोगः – रोचतेः प्रयोगे चतुर्थी

प्रथमा

चतुर्थी

| | |
|---|---|
| बालकः | मधुरम् |
| गजः | इक्षुदण्डः |
| भगिनी | चित्रम् |
| अम्बिका | सङ्गीतम् |
| कार्यकर्ता | कार्यम् |
| मुनिः | आश्रमः |
| त्वम् | कदलीफलम् |
| शिशुः | क्रीडा |
| अहम् | शास्त्रम् |
| सन्ततिः | संस्कृतिः |
| वयम् | संस्कृतम् |

उदा॰ – बालकाय मधुरं रोचते ।

१. ------------------------

२. ------------------------

३. ------------------------

४. ------------------------

५. ------------------------

६. ------------------------

७. ------------------------

८. ------------------------

९. ------------------------

१०. ------------------------

गजाय

भगिन्यै

अम्बिकायै

कार्यकर्त्रे

मुनये

तुभ्यम्

शिशवे

मह्यम्

सन्ततये

अस्मभ्यम्

| | |
|---|---|
| __________ नमः। (गणेशः) | गणेशाय |
| __________ नमः। (सरस्वती) | सरस्वत्यै |
| __________ नमः। (शिवः) | शिवाय |
| __________ नमः। (भगवान्) | भगवते |
| __________ नमः। (गुरुः) | गुरवे |
| __________ नमः। (सविता) | सवित्रे |
| __________ नमः। (अम्बा) | अम्बायै |

| | |
|---|---|
| आरक्षकः ________ कुप्यति। (चौरः) | चौराय |
| सज्जनः ________ कुप्यति। (दुर्जनः) | दुर्जनाय |
| सैनिकः ________ कोपं करोति। (शत्रुः) | शत्रवे |
| गुरुः ________ कुप्यति । (शिष्याः) | शिष्येभ्यः |
| अधिकारी ________ कुप्यति । (सेवकः) | सेवकाय |
| भीमः ________ कुप्यति। (दुर्योधनः) | दुर्योधनाय |
| सः ________ कुप्यति। (अस्मद्-अहम् ) | मह्यम् |

# तृतीया विभक्तिः

## सह / सार्धम् / समम्

## विना, अलम्, हीनः

| तृतीया वि० | | एकवचनम् | द्विवचनम् | बहुवचनम् | अन्य-उदाहरणानि |
|---|---|---|---|---|---|
| अ-पुं | देव | देवेन | देवाभ्याम् | देवैः | हस्त, स्यूत, प्रकोष्ठ, बालक, ग्राम |
| अ-नपुं | वन | वनेन | वनाभ्याम् | वनैः | गृह, मुख, उद्यान, नगर, क्षेत्र, सस्य |
| इ-पुं | कवि | कविना | कविभ्याम् | कविभिः | अग्नि, निधि, राशि, हरि, ध्वनि, हरि |
| उ-पुं | गुरु | गुरुणा | गुरुभ्याम् | गुरुभिः | वटु, तरु, बाहु, तन्तु, इक्षु, शिशु |
| ऋ-पुं | नेतृ | नेत्रा | नेतृभ्याम् | नेतृभिः | कर्तृ, नेतृ, अध्येतृ, वक्तृ, श्रोतृ, पितृ |
| उ-नपुं | वस्तु | वस्तुना | वस्तुभ्याम् | वस्तुभिः | अश्रु, श्मश्रु, मधु |

| तृतीया वि० | | एकवचनम् | द्विवचनम् | बहुवचनम् | अन्य-उदाहरणानि |
|---|---|---|---|---|---|
| आ-स्त्री | माला | मालया | मालाभ्याम् | मालाभिः | पत्रिका, लता, बाला, शाला, |
| इ-स्त्री | मति | मत्या | मतिभ्याम् | मतिभिः | व्यक्ति, पङ्क्ति, कृति, तिथि |
| ई-स्त्री | देवी | देव्या | देवीभ्याम् | देवीभिः | जननी, घटी, लेखनी, वीथी |
| ऋ-स्त्री | मातृ | मात्रा | मातृभ्याम् | मातृभिः | दुहितृ, स्वसृ, ननादृ |
| उ-स्त्री | धेनु | धेन्वा | धेनुभ्याम् | धेनुभिः | चञ्चु, रज्जु, |
| ऊ-स्त्री | वधू | वध्वा | वधूभ्याम् | वधूभिः | |

| सर्वनामरूपाणि | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| एतत् | पुं/नपुं | एतेन | एताभ्याम् | एतैः |
| | स्त्री | एतया | एताभ्याम् | एताभिः |
| तत् | पुं/नपुं | तेन | ताभ्याम् | तैः |
| | स्त्री | तया | ताभ्याम् | ताभिः |
| किम् | पुं/नपुं | केन | काभ्याम् | कैः |
| | स्त्री | कया | काभ्याम् | काभिः |

| सर्वनामरूपाणि | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| भवत् | पुं | भवता | भवद्भ्याम् | भवद्भिः |
| | स्त्री | भवत्या | भवतीभ्याम् | भव |
| सर्व | पुं/नपुं | सर्वेण | सर्वाभ्याम् | सर्वैः |
| सर्वा | स्त्री | सर्वया | सर्वाभ्याम् | सर्वाभिः |
| अस्मद् | | मया | आवाभ्याम् | अस्माभिः |
| युष्मद् | | त्वया | युवाभ्याम् | युष्माभिः |



बालः (दण्डः) दण्डेन ताडयति।



बालः (चषकः) चषकेण पिबति।



सा (हस्तः) हस्तेन भोजनं करोति।



बालिका (कन्दुकः) कन्दुकेन क्रीडति।




बालकः (हस्तौ) हस्ताभ्यां प्रणमति।



बालिका (मुखम्) मुखेन पठति।



बालिका (चषकः) चषकेण पिबति।



सः (पादौ) पादाभ्यां ग्रामं गच्छति।



| | |
|---|---|
| हस्तः | ददाति |
| दन्तकूर्चः | दन्तधावनम् |
| फेनकम् | स्नानम् |
| वाहनम् | गच्छति |
| कन्दुकः | क्रीडति |
| उपनेत्रम् | पश्यति |



सः (छुरिका) छुरिकया कर्तयति ।




युवकः (द्विचक्रिका) द्विचक्रिकया गच्छति ।



सा (पत्रिका) पत्रिकया नौकां करोति ।



बालिका (नासिका) नासिकया जिघ्रति ।



| | |
|---|---|
| द्विचक्रिका | गच्छति |
| मापिका | मापयति |
| नासिका | जिघ्रति |
| स्थालिका | आनयति |
| माला | अलङ्करोति |
| शिला | निर्माति |



बालिका (कूपी) कूप्या जलं पिबति ।



एषा (अङ्कनी) अङ्कन्या चित्रं लिखति ।



सः (द्रोणी) जलं नयति ।



सः (लेखनी) लेखन्या लिखति ।



| | |
|---|---|
| कर्तरी | कर्तयति |
| दर्वी | परिवेषयति |
| अङ्गुली | दर्शयति |
| दूरवाणी | शृणोति |
| मार्जनी | मार्जयति |
| सम्मार्जनी | मार्जयति |

# तृतीया विभक्तिः

## सह / सार्धम् / समम्





लक्ष्मणः (रामः) रामेण सह गच्छति ।



पिता (पुत्रः) पुत्रेण सह क्रीडति ।



सा (सखी) सख्या सह सम्भाषणं करोति ।



सः (भगिनी) भगिन्या सह पश्यति ।

| | | | |
|---|---|---|---|
| राजेशः | मनीषः | सह | पठति |
| अभिषेकः | प्रकाशः | सार्धं | लिखति |
| भगिनी | अनुजः | समं | नृत्यति |
| पिता | पुत्री | सह | क्रीडति |
| पुत्रः | जननी | सार्धं | गच्छति |
| अनुजः | भगिनी | समं | खादति |

# तृतीया विभक्तिः
# विना







(प्रकाशः)प्रकाशेन विना पादपः न विकसति।

मत्स्यः (जलं) जलेन विना न जिवति।





बालकाः (शाला)शालया विना कथं पठेयुः?

अन्धः (नेत्रे) नेत्राभ्यां विना द्रष्टुं न शक्नोति।

| | |
|---|---|
| माता ________ (शिशुः) विना न खादति । | शिशुना |
| ________ (परिश्रमः) विना सफलता न भवति। | परिश्रमेण |
| ________ (व्यायामः) विना शरीरं स्वस्थं न भवति। | व्यायामेन |
| लक्ष्मणः ________ (पत्नी) विना वनं गतवान् । | पत्न्या |
| ________ (प्राणवायुः) विना जीवनं अशक्यम् । | प्राणवायुना |
| अहं ________ (घटी) विना कथं समयं पश्यामि? | घट्या |
| ________ (मुखावरणं) विना बहिर्गमनं न करणीयम्। | मुखावरणेन |

# तृतीया विभक्तिः

# अलम्



| | |
|---|---|
| शिक्षकः अवदत् - अलं ________ (कोलाहलः) | कोलाहलेन |
| अलम् ________ ( आलस्यम् )। | आलस्येन |
| अलं ________ (रोदनम् ) । | रोदनेन |
| अलं ________ ( भोजनम् ) । | भोजनेन |
| अलं ________ (कलहः) । | कलहेन |
| अलं ________ (हास्यम् ) । | हास्येन |
| अलं ________ (बहिर्गमनं) । | बहिर्गमनेन |

# तृतीया विभक्तिः
# हीनः



| | |
|---|---|
| ________ (धनं) हीनः कथं जीवेत् ? | धनेन |
| ________ (विद्या) हीनः जनः कथं चिन्तयेत् ? | विद्यया |
| ________ (ज्ञानं) हीनः नरः न शोभते । | ज्ञानेन |
| ________ (धर्मः) हीनः नरःपशुभिः समानः । | धर्मेण |
| अहं ________ (स्वादः) हीनं भोजनं न खादामि । | स्वादेन |
| अयं जनः ________ (गुणः) हीनः अस्ति । | गुणेन |
| संसारे ________ (परिश्रमः)हीनः नरः सफलः न भवति। | परिश्रमेण |

# द्वितीया विभक्तिः

## परितः / निकषा / प्रति / विना






बालकः (मन्त्रः) मन्त्रं पठति।

बालिका (पाठः) पाठं पठति।





बालिका (फलरसः) फलरसं पिबति।

सः (ग्रामः) ग्रामं गच्छति।







बालकः (भगवद्गीता) भगवद्गीतां पठति ।

युवकः (पत्रिका) पत्रिकां पठति ।






बालिका (शाला) शालां गच्छति ।

गृहिणी (पूजा) पूजां करोति ।

| द्वितीया वि० | | एकवचनम् | द्विवचनम् | बहुवचनम् | अन्य-उदाहरणानि |
|---|---|---|---|---|---|
| अ-पुं | देव | देवम् | देवौ | देवान् | हस्त, स्यूत, प्रकोष्ठ, बालक, ग्राम |
| अ-नपुं | वन | वनम् | वने | वनानि | गृह, मुख, उद्यान, नगर, क्षेत्र, सस्य |
| इ-पुं | कवि | कविम् | कवी | कवीन् | अग्नि, निधि, राशि, हरि, ध्वनि, हरि |
| उ-पुं | गुरु | गुरुम् | गुरू | गुरून् | वटु, तरु, बाहु, तन्तु, इक्षु, शिशु |
| ऋ-पुं | नेतृ | नेतारम् | नेतारौ | नेतॄन् | कर्तृ, नेतृ, अध्येतृ, वक्तृ, श्रोतृ, पितृ |
| उ-नपुं | वस्तु | वस्तु | वस्तुनी | वस्तूनि | अश्रु, श्मश्रु, मधु |

| द्वितीया वि० | | एकवचनम् | द्विवचनम् | बहुवचनम् | अन्य-उदाहरणानि |
|---|---|---|---|---|---|
| आ-स्त्री | माला | मालाम् | माले | मालाः | पत्रिका, लता, बाला, शाला, |
| इ-स्त्री | मति | मतिम् | मती | मतीः | व्यक्ति, पङ्क्ति, कृति, तिथि |
| ई-स्त्री | देवी | देवीम् | देव्यौ | देवीः | जननी, घटी, लेखनी, वीथी |
| ऋ-स्त्री | मातृ | मातरम् | मातरौ | मातॄः | दुहितृ, स्वसृ, ननादृ |
| उ-स्त्री | धेनु | धेनुम् | धेनू | धेनूः | चञ्चु, रज्जु, |
| ऊ-स्त्री | वधू | वधूम् | वध्वौ | वधूः | |

| सर्वनामरूपाणि | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| एतत् | पुं | एतम् | एतौ | एतान् |
| | नपुं | एतत् | एते | एतानि |
| | स्त्री | एताम् | एते | एताः |
| तत् | पुं | तम् | तौ | तान् |
| | नपुं | तत् | ते | तानि |
| | स्त्री | ताम् | ते | ताः |
| किम् | पुं | कम् | कौ | कान् |
| | नपुं | किम् | के | कानि |
| | स्त्री | काम् | के | काः |

| सर्वनामरूपाणि | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| भवत् | पुं | भवन्तम् | भवन्तौ | भवतः |
| | स्त्री | भवतीम् | भवत्यौ | भवतीः |
| सर्व | पुं | सर्वम् | सर्वौ | सर्वान् |
| | नपुं | सर्वम् | सर्वे | सर्वाणि |
| | स्त्री | सर्वाम् | सर्वे | सर्वाः |
| अस्मद् | | माम्/मा | आवाम्/नौ | अस्मान्/नः |
| युष्मद् | | त्वाम्/त्वा | युवाम्/वाम् | युष्मान्/वः |

# द्वितीया विभक्तिः

# परितः







(पुष्पं) पुष्पं परितः भ्रमराः उड्डयन्ति।

(शर्करा) शर्करां परितः पिपीलिकाः सन्ति।





(नेता) नेतारं परितः बालकाः सन्ति ।

(गुरुः) गुरुं परितः शिष्याः सन्ति।

| | |
|---|---|
| __________ (वृक्षः) परितः बालाः क्रीडन्ति। | वृक्षम् |
| __________ (माता) परितः शिशवः सन्ति। | मातरम् |
| __________ (अस्मद्) परितः पुस्तकानि सन्ति। | माम् |
| __________ (युष्मद्) परितः के सन्ति? | त्वाम् |
| __________ (नृप) परितः सैनिकाः सन्ति। | नृपम् |
| __________ (शिक्षकः) परितः छात्राः पठन्ति। | शिक्षकम् |
| __________ (बालकाः) परितः वृक्षाः सन्ति। | बालकान् |

# द्वितीया विभक्तिः

# निकषा(समीपम् )





(वृक्षः) वृक्षं निकषा वानरः अस्ति।



(माता) मातरं निकषा पुत्री पठति।



(मार्गः) मार्गं निकषा भवनानि सन्ति।



(शिक्षिका) शिक्षिकां निकषा छात्राः सन्ति।

| | |
|---|---|
| __________ (बालकः) निकषा क्रीडनकानि सन्ति। | बालकं |
| __________ (भगिनी) निकषा भ्राता अस्ति। | भगिनीं |
| __________ (गृहम्) निकषा विक्षाः सन्ति । | गृहं |
| __________ (लेखनी) निकषा पुस्तकानि सन्ति। | लेखनीं |
| __________ (रामः) निकषा सीता उपविष्टा अस्ति। | रामं |
| __________ (देवालयः) निकषा उद्यानम् अस्ति। | देवालयं |
| __________ (सः) निकषा तस्य मित्राणि पठन्ति। | तं |

# द्वितीया विभक्तिः

# प्रति





नदी (सागरः) सागरं प्रति वहति।



बिडालः (मूषकः) मूषकं प्रति धावति ।




बालकाः (शाला) शालां प्रति गच्छन्ति।




आरक्षकः (चौरः) चौरं प्रति धावति।

| | |
|---|---|
| भक्ताः ________ (देवालयः) प्रति गच्छन्ति। | देवालयं |
| भीमः ________ (मोदकं) प्रति गच्छति । | मोदकं |
| पिता ________ (पुत्रः) प्रति पश्यति। | पुत्रं |
| अहं ________ (देहली) प्रति गमिष्यामि । | देहलीं |
| विराटः कन्दुकं ________ (महेन्द्रः) प्रति क्षिपति। | महेन्द्रं |
| फलानि ________ (भूमिः) प्रति पतन्ति। | भूमिं |
| वत्सः ________ (धेनुः) प्रति गच्छति। | धेनुं |

# द्वितीया विभक्तिः
# विना





(प्रकाशः) प्रकाशं विना पादपः न विकसति।



मत्स्यः (जलं) जलं विना न जिवति।



बालकाः (शाला) शालां विना कथं पठेयुः?



अन्धः (नेत्रे) नेत्रे विना द्रष्टुं न शक्नोति।

| | |
|---|---|
| माता ________ (शिशुः) विना न खादति । | शिशुं |
| ________ (परिश्रमः) विना सफलता न भवति। | परिश्रमं |
| ________ (व्यायामः) विना शरीरं स्वस्थं न भवति। | व्यायामं |
| लक्ष्मणः ________ (पत्नी) विना वनं गतवान् । | पत्नीं |
| ________ (प्राणवायुः) विना जीवनं अशक्यम् । | प्राणवायुं |
| अहं ________ (घटी) विना कथं समयं पश्यामि? | घटीं |
| ________ (मुखावरणं) विना बहिर्गमनं न करणीयम्। | मुखावरणं |

# उदाहरणानुगुणं वाक्यानि पूरयन्तु ।

कार्यालयम्

एतम्

१. ऋषिम् उभयतः नागरिकाः सन्ति । (ऋषिः)
२. .................... परितः गृहाणि सन्ति । (कार्यालयः)
३.................. विना प्रकाशः न भवति । (भानुः)
४................ परितः महिलाः उपविशन्ति । (वधूः)
५. त्वां परितः बालाः सन्ति । (त्वम् ) ।
६. .................... विना मित्रं न क्रीडति । (एषः)
७. भगिनी ........... विना भोजनं न करोति । (अवलेहं)
८. .................... परितः जनाः तिष्ठन्ति । (ऐन्द्रजालिकः)
९. .............. उभयतः श्रोतारः उपविशन्ति । (कविः)
१०........................उभयतः नेत्रे स्तः । (नासिका)

# कोष्ठके दत्तानां शब्दानाम् आधारेण वाक्यानि रचयन्तु ।  पृ.सं. ९५

१. कार्यालयम् उभयतः मार्गाः सन्ति ।
२. ......................................।
३. ......................................।
४. ......................................।
५. ......................................।

६. .............. परितः ..................।
७. ......................................।
८. ......................................।
९. ......................................।
१०. ......................................।

११. ............... विना मीनाः न जीवन्ति ।
१२. ....................जीवितुं न शक्यते ।
१३. ......................... न पठन्ति ।
१४. ......................... न शोभते ।
१५. .........................न शोभते ।

| | | |
|---|---|---|
| कार्यालयः | | मार्गाः |
| नेतारः | | जनाः |
| नदी | उभयतः | सस्यानि |
| माता | | बालाः |
| जिह्वा | | दन्ताः |

| | | |
|---|---|---|
| शिशुः | | क्रीडनकानि |
| जनाः | | आरक्षकाः |
| क्रीडाङ्गणं | परितः | दर्शकाः |
| देवालयाः | | पुष्पाणि |
| अवकरः | | मक्षिकाः |

| | | |
|---|---|---|
| जलम् | | मीनाः |
| वायुः | | प्राणिनः |
| अनुशासनम् | विना | छात्राः |
| लेखनी | | छात्रः |
| पुष्पाणि | | उद्यानम् |

| | | | |
|---|---|---|---|
| **प्र.१** | **एकपदेन उत्तरं लिखत -** | | |
| १ | वित्ततः क्षीणः कीदृशः भवति? | | अक्षीणः |
| २ | कस्य प्रतिकूलानि कार्याणि परेषां न समाचरेत्? | | आत्मनः |
| ३ | कुत्र दरिद्रता न भवेत्? | | वचने |
| ४ | वृक्षाः स्वयं कानि न खादन्ति? | | फलानि |
| ५ | का पुरा लघ्वी भवति? | | सज्जनानां मैत्री (सतां=सज्जानानां) |
| **प्र.२** | **अधोलिखितप्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत-** | | |
| १ | यत्नेन किं रक्षेत् वित्तं वृत्तं वा? | | वृत्तम् |
| २ | अस्माभिः (किं न समाचरेत्) कीदृशम् आचरणं न कर्तव्यम्? | | अस्माभिः आत्मनः प्रतिकूलम् आचरणं परैः सह न कर्तव्यम् |
| ३ | जन्तवः केन तुष्यन्ति? | | जन्तवः प्रियवाक्यप्रदानेन तुष्यन्ति। |
| ४ | सज्जनानां मैत्री कीदृशी भवति? | | सज्जनानां मैत्री पुरा लघ्वी, पश्चात् च वृद्धिमती भवति। |
| ५ | सरोवराणां हानिः कदा भवति? | | मरालैः(=हंसैः) सह विप्रयोगेण सरोवराणां हानिः भवति। |
| **प्र.३** | **क स्तम्भे विशेषणानि, ख स्तम्भे विशेष्याणि दत्तानि, तानि यथोचितं योजयत-** | | |
| | क | ख | उत्तराणि |
| क) | आस्वाद्यतोयाः | १) खलानां मैत्री | नद्यः |
| ख) | गुणयुक्तः | २) सज्जनानां मैत्री | दरिद्रः |
| ग) | दिनस्य पूर्वार्धभिन्ना | ३) नद्यः | खलानां मैत्री |
| घ) | दिनस्य परार्धभिन्ना | ४) दरिद्रः | सज्जनानां मैत्री |
| **प्र.४** | **अधोलिखितयोः श्लोकयोः आशयं हिन्दीभाषया आङ्ग्लभाषया च लिखत-** | | |
| क) | आरम्भगुर्वी क्षयिणी क्रमेण<br>लघ्वी पुरा वृद्धिमती च पश्चात्।<br>दिनस्य पूर्वार्धपरार्धभिन्ना<br>छायेव मैत्री खलसज्जनानाम्॥ | | |
| ख) | प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।<br>तस्मात्तदेव वक्तव्यं वचने का दरिद्रता ॥ | | |
| **प्र.५** | **अधोलिखितपदेभ्यः भिन्नप्रकृतिकं पदं चित्वा लिखत-** | | |
| क) | वक्तव्यम्, कर्तव्यम्, सर्वस्वम्, हन्तव्यम् | | सर्वस्वम् |
| ख) | यत्नेन, वचने, प्रियवाक्यप्रदानेन, मरालेन | | वचने |
| ग) | श्रूयताम्, अवधार्यताम्, धनवताम्, क्षयताम् | | धनवताम् (धन+मतुप्=धनवत्) धनवान् ष.वि. ब.व. |
| घ) | जन्तवः, नद्यः, विभूतयः, परितः | | परितः |

कक्षा – ९ पाठः ५ सूक्तिमौक्तिकम् अभ्यासः

| | | |
|---|---|---|
| **प्र.६** | **स्थूलपदानि अधिकृत्य प्रश्नवाक्यनिर्माणं कुरुत-** | |
| क) | **वृत्ततः** क्षीणः हतः भवति। | ~~कः~~ कस्मात् |
| ख) | **धर्मसर्वस्वं** श्रुत्वा अवधार्यताम्। | ~~किं~~ किम् |
| **ग)** | **वृक्षाः फलं न खादन्ति।** | ~~काः~~ के |
| घ) | **खलानाम्** मैत्री आरम्भगुर्वी भवति। | ~~काम्~~ केषाम् |
| **प्र.७** | **अधोलिखितानि वाक्यानि लोट् लकारे परिवर्तयत-** | |
| क) | नद्यः आस्वद्यतोयाः सन्ति। | नद्यः आस्वाद्यतोयाः सन्तु। |
| ख) | सः सदैव प्रियवाक्यं वदति। | सः सदैव प्रियवाक्यं वदतु। |
| ग) | त्वं परेषां प्रतिकूलानि न समाचरसि। | त्वं परेषां प्रतिकूलानि न समाचर। |
| घ) | ते वृत्तं यत्नेन संरक्षन्ति। | ते वृत्तं यत्नेन संरक्षन्ति। |
| ङ) | अहं परोपकाराय कार्यं करोमि। | अहं परोपकाराय कार्यं करवाणि। |

# पञ्चमः पाठः

## प्रथमः भागः

# सूक्तिमौक्तिकम्

सूक्तिरूपं मौक्तिकम् इति अर्थः ।

रत्नम् इव बहुमूल्यानि वचनानि इति भावः ।

# पाठपरिचयः

संस्कृतसाहित्ये नीतिग्रन्थानां समृद्धपरम्परा अस्ति । यत्र अत्यन्तसारल्येन सारगर्भिताः नैतिकशिक्षाः प्रदत्ताः सन्ति । याः उपयुज्य मनुष्यः स्वजीवनं सफलं समृद्धञ्च कर्तुं शक्नोति । अस्मिन् पाठे एतादृश्यः मनोहारिण्यः बहुमूल्याः च सूक्तयः सङ्कलिताः सन्ति। एतासु सूक्तिषु-

- सदाचारस्य महत्ता ।
- मधुरवाण्याः आवश्यकता ।
- परोपकारिणः पुरुषस्य स्वभावः ।
- गुणार्जनस्य प्रेरणा मित्रतायाः स्वरूपं च ।
- उत्तमपुरुषस्य सम्पर्केण जायमानायाः शोभायाः प्रशंसा ।
- सत्संगतेः महिमा ।

इत्यादीनां विषयाणां प्रतिपादनं कृतं वर्तते ।

# सूक्तिमौक्तिकम्

वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च ।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः ।। (मनुस्मृतिः)

श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ।। (विदुरनीतिः)

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्माद् तदेव वक्तव्यं वचने का दरिद्रता ।। (चाणक्यनीतिः)

पिबन्ति नद्यः स्वयमेव नाम्भः स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सस्यं खलु वारिवाहाः परोपकाराय सतां विभूतयः ।।

(सुभाषितरत्नभाण्डागारम्)

गुणेष्वेव हि कर्तव्यः प्रयत्नः पुरुषैः सदा ।
गुणयुक्तो दरिद्रोऽपि नेश्वरैरगुणैः समः ।। (मृच्छकटिकम्)

आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना छायेव मैत्री खलसज्जनानाम् ।। (नीतिशतकम्)

यत्रापि कुत्रापि गता भवेयुर्हंसा महीमण्डलमण्डनाय ।
हानिस्तु तेषां हि सरोवराणां येषां मरालैः सह विप्रयोगः ।। (भामिनीविलासः)

गुणा गुणज्ञेषु गुणा भवन्ति ते निर्गुणं प्राप्य भवन्ति दोषाः।
आस्वाद्यतोयाः प्रवहन्ति नद्यः समुद्रमासाद्य भवन्त्यपेयाः ।।

(हितोपदेशः)

वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च ।

अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः ॥

वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च ।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः ।।

# पदच्छेदः

वृत्तम्, यत्नेन, संरक्षेत्, वित्तम्, एति, च, याति, च,

अक्षीणः, वित्ततः, क्षीणः, वृत्ततः, तु, हतः, हतः ।

वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च ।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः ।।

# अन्वयः

वृत्तं यत्नेन संरक्षेद् वित्तं एति च याति च वित्ततः

क्षीणः अक्षीणः वृत्ततः (क्षीणः) तु हतः हतः ।

> वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च ।
> अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः ॥

## पदपरिचयः पदार्थाः च -

| | | | |
|---|---|---|---|
| ▪ वृत्तम् | (‘वृत्त’ अका. नपुं. द्वि.वि. एक.) | = | चरित्रम् |
| ▪ यत्नेन | (‘यत्न’ अका. पुं. तृ.वि. एक.) | = | प्रयासेन |
| ▪ संरक्षेत् | (‘सम्’ उप. ‘रक्ष्’ धातुः वि.लि. प्र.पु. एक.) | = | रक्षां कुर्यात् |
| ▪ वित्तम् | (‘वित्त’ अका. नपुं. प्र.वि. एक.) | = | धनम् |
| ▪ च | (समाहारार्थकम् अव्ययपदम्) | = | और(हि.)/And(आं.) |
| ▪ एति | (‘आङ्’ उप.‘इण्’ धातुः लट्ल. प्र.पु. एक.) | = | आगच्छति |
| ▪ याति | (‘या’ धातुः लट्ल. प्र.पु. एक.) | = | गच्छति |

वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः ॥

## पदपरिचयः पदार्थाः च -

- वित्ततः ('वित्त' 'तसिल्'प्रत्ययः, अव्ययम्) = वित्तात्
- क्षीणः ('क्षीण' अकारा. पुं. प्र.वि. एक.) = नष्टः
- अक्षीणः (न क्षीणः = अक्षीणः अकारा.पुं. प्र.वि. एक.) = नष्टः न
- वृत्ततः ('वृत्त' 'तसिल्'प्रत्ययः, अव्ययम्) = वृत्तात्
- तु (बलात्मकम् इत्यर्थे प्रयुक्तम् अव्ययपदम्)
- हतः ('हन्' धातुः 'क्त'प्रत्ययः अकारा. पुं. प्र.वि. एक.) = नष्टः मृतः च

> वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च।
> अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः ॥

## भावावबोधनम् -

संरक्षेत् अर्थात् रक्षणीयम्

- केन रक्षणीयम् ? — मानवेन रक्षणीयम्।
- मानवेन किं रक्षणीयम् ? — मानवेन वृत्तं (चरित्रम्) रक्षणीयम्।
- मानवेन वृत्तं कथं रक्षणीयम् ? — मानवेन यत्नेन वृत्तं रक्षणीयम्।

एति याति च अर्थात् आगच्छति गच्छति च

- किम् एति याति च ? — वित्तम् (धनम्) एति याति च।

क्षीणः अर्थात् नष्टः

- कः क्षीणः? — मानवः क्षीणः।
- मानवः कस्मात् क्षीणः ? — मानवः वित्तात् (धनात्) क्षीणः।
- वित्तात् क्षीणः मानवः कीदृशः भवति ? — वित्तात् क्षीणः मानवः क्षीणः न भवति।
- कस्मात् क्षीणः मानवः हतो हतः ? — वृत्तात् क्षीणः मानवः हतो हतः।

वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च ।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः ॥

# तात्पर्यम्

मानवेन चरित्रं प्रयासपूर्वकं रक्षणीयं परन्तु सः धनं यत्नेन रक्षयति । धनं तु आगच्छति गच्छति च । यदा धनं नष्टं भवति तदा किमपि नष्टं न भवति परन्तु यदा चरित्रं नष्टं भवति तदा सर्वं नष्टं भवति । चरित्रहीनः मानवः मृतः एव ।

वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च ।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः ॥

# हिन्द्यर्थः

मनुष्य को यत्नपूर्वक चरित्र की रक्षा करनी चाहिए, परन्तु वह धन सम्पत्ति के संरक्षण में लगा रहता है । धन सम्पत्ति तो आनी जानी है, धन सम्पत्ति के नष्ट होने पर कुछ भी नष्ट नहीं होता परन्तु जब चरित्र नष्ट होता है तो सब कुछ नष्ट हो जाता है । चरित्रहीन मानव प्रायः मरा हुआ ही है ।

वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च ।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः ॥

# आङ्ग्लाभिप्रायः

**Man preserves wealth with a lot of effort. Wealth is transitory, it comes and goes. When wealth is lost, nothing is lost. It is 'Character', which needs to be preserved with effort. Because when character is lost, he is certainly dead.**

श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् ।

आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥

श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥

# पदच्छेदः

श्रूयताम्, धर्मसर्वस्वम्, श्रुत्वा, च, एव, अवधार्यताम्,

आत्मनः, प्रतिकूलानि, परेषाम्, न, समाचरेत् ।

श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥

# अन्वयः

धर्मसर्वस्वं श्रूयतां श्रुत्वा च एव अवधार्यताम्

आत्मनः प्रतिकूलानि परेषां न समाचरेत् ।

> श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् ।
> आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥

## पदपरिचयः पदार्थाः च -

| | | | |
|---|---|---|---|
| धर्मसर्वस्वम् | ('धर्मसर्वस्व' अकारा. नपुं. प्र.वि. एक.) | = | धर्मस्य सारः |
| श्रूयताम् | ('श्रु'कर्मणि लोट्ल. प्र.पु. एक.) | = | श्रोतव्यः |
| श्रुत्वा | ('श्रु'धातुः 'क्त्वा'प्रत्ययः) | = | श्रवणं कृत्वा |
| च | (अवधारणार्थकम् अव्ययम्) | = | और (हि.) /And (आं.) |
| एव | (निश्चयार्थकम् अव्ययम्) | = | हि |
| अवधार्यताम् | ('अव' उप. 'धृ' धातुः कर्मणि लोट्ल. प्र.पु. एक.) | = | धारणं करोतु |
| आत्मनः | ('आत्मन्' नकारा. पुं. ष.वि. एक.) | = | स्वस्य |
| प्रतिकूलानि | ('प्रतिकूल' अकारा. नपुं. द्वि.वि. बहु.) | = | विरुद्धानि |
| परेषाम् | ('पर' अकारा. सर्व. पुं. ष.वि. बहु.) | = | अन्येषाम् |
| न | (निषेधात्मकम् अव्ययम्) | = | न हि |
| समाचरेत् | ('सम्' 'आङ्' उप. 'चर्' धातुः वि.लि. प्र.पु. एक.) | = | आचरणीयम् |

श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥

## भावावबोधनम् -

श्रूयताम् अर्थात् श्रोतव्यम्

- किं श्रोतव्यम् ? — धर्मसर्वस्वं श्रोतव्यम् ।
- धर्मसर्वस्वं श्रुत्वा किं करणीयम् ? — धर्मसर्वस्वं श्रुत्वा धारणीयम् ।

न समाचरेत् अर्थात् न आचरणीयम्

- कानि न आचरणीयानि ? — प्रतिकूलानि (कार्याणि) न आचरणीयानि ।
- कीदृशानि प्रतिकूलानि न आचरणीयानि?

  यानि आत्मनः प्रतिकूलानि, तानि न अचरणीयानि ।
- केषां कृते न आचरणीयानि?

  परेषां कृते न आचरणीयानि । यानि (कार्याणि) स्वस्य कृते प्रतिकूलानि भवन्ति तानि परेषां कृते न आचरणीयानि ।

श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥

# तात्पर्यम्

धर्मस्य सारः श्रोतव्यः श्रुत्वा च आचरणे धारणीयः पालनीयः च, यद् आचरणं स्वस्य कृते अनुकूलं न अस्ति तादृशम् आचरणम् अन्येषां कृते न करणीयम् ।

श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥

# हिन्द्यर्थः

धर्म का सार सुनकर जीवन में उसका पालन करना चाहिए। जो आचरण स्वयं को अच्छा न लगता हो वैसा आचरण अन्यों के साथ नहीं करना चाहिए।

श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥

# आङ्ग्लाभिप्रायः

**One should listen to the sum total of dharma and sustain oneself in it. One should not do unto others what would be detrimental to oneself.**

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।

तस्माद् तदेव वक्तव्यं वचने का दरिद्रता ॥

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्माद् तदेव वक्तव्यं वचने का दरिद्रता ॥

# पदच्छेदः

प्रियवाक्यप्रदानेन, सर्वे, तुष्यन्ति, जन्तवः, तस्मात्,

तत्, एव, वक्तव्यम्, वचने, का, दरिद्रता ।

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्माद् तदेव वक्तव्यं वचने का दरिद्रता ॥

# अन्वयः

सर्वे जन्तवः प्रियवाक्यप्रदानेन तुष्यन्ति, तस्मात्

तदेव वक्तव्यं वचने दरिद्रता का ?

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्माद् तदेव वक्तव्यं वचने का दरिद्रता ॥

**पदपरिचयः पदार्थाः च -**

| | | | |
|---|---|---|---|
| सर्वे | ('सर्व' अकारा. सर्व. पुं. प्र.वि. बहु.) | = | समस्ताः |
| जन्तवः | ('जन्तु' उकारा. पुं. प्र.वि. बहु.) | = | प्राणिनः |
| प्रियवाक्यप्रदानेन | ('प्रियवाक्यप्रदान' अकारा. नपुं. तृ.वि. एक.) | = | मधुरवाण्या |
| तुष्यन्ति | ('तुष्' धातुः लट्ल. प्र.पु. बहु.) | = | सन्तोषम् अनुभवन्ति |
| तस्मात् | ('तद्' दकारा. सर्व. नपुं. प.वि. एक.) | = | तस्मात् कारणात् |
| तदेव | (तत् + एव) | | अर्थात् प्रियवाक्यम् एव |
| वक्तव्यम् | ('वच्' धातुः 'तव्यत्'प्रत्ययः अकारा. नपुं. प्र.वि. एक.) | = | भाषणीयम् |
| वचने | ('वचन' अकारा. नपुं. स.वि. एक.) | = | भाषणे |
| दरिद्रता | ('दरिद्रता' आकारा. स्त्री. प्र.वि. एक.) | = | निर्धनता |
| का | ('किम्' मकारा. सर्व. स्त्री. प्र.वि. एक.) | = | किमर्थम् |

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्माद् तदेव वक्तव्यं वचने का दरिद्रता ।।

## भावावबोधनम् -

तुष्यन्ति अर्थात् सन्तोषम् अनुभवन्ति

| | |
|---|---|
| ❑ के सन्तोषम् अनुभवन्ति ? | सर्वे जन्तवः सन्तोषम् अनुभवन्ति । |
| ❑ सर्वे जन्तवः केन तुष्यन्ति ? | सर्वे जन्तवः प्रियवाक्यप्रदानेन तुष्यन्ति । |

वक्तव्यम् अर्थात् वदनीयम्

| | |
|---|---|
| ❑ किं वक्तव्यम् ? | तदेव (प्रियवाक्यमेव) वक्तव्यम् । |
| ❑ 'तदेव' इति पदस्य कः अर्थः ? | 'तदेव' इति पदस्य 'प्रियवाक्यम्' इति अर्थः। |
| ❑ तस्मात् किम् वक्तव्यम् ? | तस्मात् प्रियवाक्यम् एव वक्तव्यम् । |
| ❑ कस्मात् प्रियवाक्यम् एव वक्तव्यम् ? | सर्वे जन्तवः प्रियवाक्यप्रदानेन सन्तोषम् अनुभवन्ति । तस्मात् प्रियवाक्यम् एव वक्तव्यम् । |
| ❑ वचने का न भवेत् ? | वचने दरिद्रता न भवेत् । |

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्माद् तदेव वक्तव्यं वचने का दरिद्रता ॥

# तात्पर्यम्

सर्वेऽपि प्राणिनः प्रियवचनानि श्रुत्वा आनन्दिताः भवन्ति । अतः सदैव प्रियवचनानि एव वक्तव्यानि । वचने दरिद्रता कदापि न भवेत् ।

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्माद् तदेव वक्तव्यं वचने का दरिद्रता ।।

# हिन्द्यर्थः

प्रिय वाणी बोलने से सभी जीव प्रसन्न होते हैं। इसलिए सदा प्रिय वाणी ही बोलना चाहिए। प्रिय बोलने में कैसी कंजूसी ?

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्माद् तदेव वक्तव्यं वचने का दरिद्रता ॥

# आङ्ग्लाभिप्रायः

**All beings become happy on hearing pleasing words. Hence always use pleasing words. By using (speaking) pleasing words more and more, no one will become poor. Hence, it can be used liberally, without any restriction.**

पिबन्ति नद्यः स्वयमेव नाम्भः स्वयं न खादन्ति फलानि वृक्षाः।

नादन्ति सस्यं खलु वारिवाहाः परोपकाराय सतां विभूतयः ॥

पिबन्ति नद्यः स्वयमेव नाम्भः स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सस्यं खलु वारिवाहाः परोपकाराय सतां विभूतयः ॥

# पदच्छेदः

पिबन्ति, नद्यः, स्वयम्, एव, न, अम्भः, स्वयम्, न,

खादन्ति, फलानि, वृक्षाः, न, अदन्ति, सस्यम्, खलु,

वारिवाहाः, परोपकाराय, सताम्, विभूतयः ।

पिबन्ति नद्यः स्वयमेव नाम्भः स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सस्यं खलु वारिवाहाः परोपकाराय सतां विभूतयः ॥

# अन्वयः

नद्यः स्वयम् एव अम्भः न पिबन्ति, वृक्षाः स्वयं फलानि न खादन्ति, खलु वारिवाहाः सस्यं न अदन्ति, सतां विभूतयः परोपकाराय ।

पिबन्ति नद्यः स्वयमेव नाम्भः स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सस्यं खलु वारिवाहाः परोपकाराय सतां विभूतयः ॥

## पदपरिचयः पदार्थाः च -

| | | | |
|---|---|---|---|
| नद्यः | ('नदी' ईकारा. स्त्री. प्र.वि. बहु.) | = | सरितः |
| स्वयम् | (निजार्थबोधकम् अव्ययम्) | = | स्वतः |
| एव | (निश्चयार्थबोधकम् अव्ययम्) | = | हि |
| अम्भः | ('अम्भस्' सकारा. नपुं. द्वि.वि. एक.) | = | जलम् |
| न | (निषेधार्थबोधकम् अव्ययम्) | = | नहि |
| पिबन्ति | ('पिब्' धातुः लट्‌ल. प्र.पु. बहु.) | = | पानं कुर्वन्ति |
| वृक्षाः | ('वृक्ष' अकारा. पुं. प्र.वि. बहु.) | = | तरवः |
| फलानि | ('फल' अकारा. नपुं. द्वि.वि. बहु.) | = | पुष्पजानि (फलानि) |

पिबन्ति नद्यः स्वयमेव नाम्भः स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सस्यं खलु वारिवाहाः परोपकाराय सतां विभूतयः ॥

## पदपरिचयः पदार्थाः च -

| | | | |
|---|---|---|---|
| ▪ खादन्ति | (‘खाद्’ धातुः लट्ल. प्र.पु. बहु.) | = | अदन्ति |
| ▪ खलु | (निश्चयार्थबोधकम् अव्ययम्) | = | निश्चयेन |
| ▪ वारिवाहाः | (‘वारिवाह’ अकारा. पुं. प्र.वि. बहु.) | = | मेघाः |
| ▪ सस्यम् | (‘सस्य’ अकारा. नपुं. द्वि.वि. एक.) | = | पादपम् |
| ▪ अदन्ति | (‘अद्’ धातुः लट्ल. प्र.पु. बहु.) | = | खादन्ति |
| ▪ परोपकाराय | (‘परोपकार’ अकारा. पुं. च.वि. एक.) | = | परेषाम् उपकाराय |
| ▪ सताम् | (‘सत्’ तकारा. पुं. ष.वि. बहु.) | = | सज्जनानाम् |
| ▪ विभूतयः | (‘विभूति’ इकारा. स्त्री. प्र.वि. बहु.) | = | सम्पत्तयः |

पिबन्ति नद्यः स्वयमेव नाम्भः स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सस्यं खलु वारिवाहाः परोपकाराय सतां विभूतयः ॥

## भावावबोधनम् -

न पिबन्ति अर्थात् पानं न कुर्वन्ति

- काः स्वयम् एव न पिबन्ति ? — नद्यः स्वयम् एव न पिबन्ति।
- नद्यः किं स्वयम् एव न पिबन्ति ? — नद्यः (स्वस्य) अम्भः (जलम्) स्वयम् एव न पिबन्ति।

न खादन्ति अर्थात् न अदन्ति

- के न अदन्ति ? — वृक्षाः स्वयं न अदन्ति।
- वृक्षाः कानि स्वयं न अदन्ति ? — वृक्षाः (स्वस्य) फलानि स्वयं न अदन्ति।

न अदन्ति अर्थात् न खादन्ति

- के न खादन्ति ? — वारिवाहाः (मेघाः) खलु न खादन्ति।
- वारिवाहाः किं न खादन्ति ? — वारिवाहाः सस्यं न खादन्ति।
- विभूतयः (सम्पत्तयः) कस्मै भवन्ति ? — विभूतयः (सम्पत्तयः) परोपकाराय भवन्ति।
- केषां विभूतयः परोपकाराय भवन्ति? — सतां (सज्जनानां) विभूतयः परोपकाराय भवन्ति।

पिबन्ति नद्यः स्वयमेव नाम्भः स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सस्यं खलु वारिवाहाः परोपकाराय सतां विभूतयः ॥

# तात्पर्यम्

नद्यः स्वयमेव स्वस्य जलं न पिबन्ति (अपितु स्वजलेन पिपासितानां पिपासां शमयन्ति)। वृक्षाः अपि स्वस्य फलानि न खादन्ति (अपितु बुभुक्षितेभ्यः यच्छन्ति) तथैव मेघाः अपि वर्षाजलेन उत्पन्नानि सस्यानि स्वयं न खादन्ति (अपितु प्राणिनाम् उदरपूर्तये अर्पयन्ति । एते सर्वे सज्जनाः इव सन्ति) यतो हि सज्जनानां सम्पत्तयः परोपकाराय भवन्ति।

पिबन्ति नद्यः स्वयमेव नाम्भः स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सस्यं खलु वारिवाहाः परोपकाराय सतां विभूतयः ॥

# हिन्द्यर्थः

नदियाँ स्वयं ही जल नहीं पीती हैं, वृक्ष स्वयं फल नहीं खाते हैं, निश्चय ही बादल भी स्वयं फसलों को नहीं खाते हैं। ये नदियां, वृक्ष और बादल सज्जनों के समान हैं क्योंकि सज्जनों की सम्पत्तियाँ परोपकार के लिए ही होती हैं।

पिबन्ति नद्यः स्वयमेव नाम्भः स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सस्यं खलु वारिवाहाः परोपकाराय सतां विभूतयः ॥

# आङ्ग्लाभिप्रायः

**Rivers do not drink their own water (thirsty people drink its water). Trees do not eat their own fruits (hungry people eat their fruits). Clouds (water carriers) do not eat the plants, they water (It is food for all beings). Similarly the wealth of noble people is always for the wellbeing of others.**

# पञ्चमः पाठः

## द्वितीयः भागः

# सूक्तिमौक्तिकम्

गुणेष्वेव हि कर्तव्यः प्रयत्नः पुरुषैः सदा ।

गुणयुक्तो दरिद्रोऽपि नेश्वरैरगुणैः समः ॥

गुणेष्वेव हि कर्तव्यः प्रयत्नः पुरुषैः सदा ।
गुणयुक्तो दरिद्रोऽपि नेश्वरैरगुणैः समः ॥

# पदच्छेदः

गुणेषु, एव, हि, कर्तव्यः, प्रयत्नः, पुरुषैः, सदा,

गुणयुक्तः, दरिद्रः, अपि, न, ईश्वरैः, अगुणैः, समः ।

गुणेष्वेव हि कर्तव्यः प्रयत्नः पुरुषैः सदा ।
गुणयुक्तो दरिद्रोऽपि नेश्वरैरगुणैः समः ।।

# अन्वयः

पुरुषैः सदा एव गुणेषु हि प्रयत्नः कर्तव्यः

गुणयुक्तः दरिद्रः अपि अगुणैः ईश्वरैः समः न ।

गुणेष्वेव हि कर्तव्यः प्रयत्नः पुरुषैः सदा ।
गुणयुक्तो दरिद्रोऽपि नेश्वरैरगुणैः समः ॥

**पदपरिचयः पदार्थाः च -**

| | | | |
|---|---|---|---|
| पुरुषैः | ('पुरुष' अकारा. पुं. तृ.वि. बहु.) | = | मानवैः |
| सदा | (अव्ययपदम्) | = | सर्वस्मिन् काले |
| एव | (निश्चयार्थबोधकम् अव्ययम्) | = | हि |
| गुणेषु | ('गुण' अकारा. पुं. स.वि. बहु.) | = | सदाचरणेषु |
| हि | (निश्चयार्थबोधकम् अव्ययम्) | = | निश्चयेन एव |
| प्रयत्नः | ('प्रयत्न' अकारा. पुं. प्र.वि. एक.) | = | प्रयासः |
| कर्तव्यः | ('कृ' धातुः 'तव्यत्' प्रत्ययः अकारा. पुं. प्र.वि. एक.) | = | करणीयः |
| गुणयुक्तः | ('गुणयुक्त' अकारा. पुं. प्र.वि. एक.) | = | गुणैः युक्तः |
| दरिद्रोऽपि | (दरिद्रः + अपि) ('दरिद्र' अकारा. पुं. प्र.वि. एक.) | = | निर्धनः अपि |
| अगुणैः | ('अगुण' अकारा. पुं. तृ.वि. बहु.) | = | गुणरहितैः |
| ईश्वरैः | ('ईश्वर' अकारा. पुं. तृ.वि. बहु.) | अर्थात् | धनिकैः |
| समः | ('सम' अकारा. पुं. प्र.वि. एक.) | = | समानः |
| न | (निषेधात्मकम् अव्ययपदम्) | = | न हि |

> गुणेष्वेव हि कर्तव्यः प्रयत्नः पुरुषैः सदा ।
> गुणयुक्तो दरिद्रोऽपि नेश्वरैरगुणैः समः ।।

## भावावबोधनम् -

कर्तव्यः अर्थात् करणीयः

- कः करणीयः ? — प्रयत्नः करणीयः ।
- कैः प्रयत्नः करणीयः ? — पुरुषैः प्रयत्नः करणीयः ।
- पुरुषैः कदा प्रयत्नः करणीयः ? — पुरुषैः सदा प्रयत्नः करणीयः ।
- पुरुषैः कुत्र सदा प्रयत्नः करणीयः ? — पुरुषैः सदा गुणेषु एव प्रयत्नः करणीयः ।
- किमर्थं पुरुषैः सदा गणेषु एव प्रयत्नः करणीयः ?

  समः (समानः) न भवति, अतः पुरुषैः सदा गणेषु एव प्रयत्नः करणीयः ।
- श्लोके 'न समः' इत्यस्य कः अभिप्रायः ? — समानः न भवति अर्थात् श्रेष्ठः भवति इति अभिप्रायः ।
- कः श्रेष्ठः भवति ? — दरिद्रः श्रेष्ठः भवति ।
- कीदृशः दरिद्रः श्रेष्ठः भवति ? — गुणयुक्तः दरिद्रः श्रेष्ठः भवति ।
- गुणयुक्तः दरिद्रः कैः श्रेष्ठः भवति ? — गुणयुक्तः दरिद्रः ईश्वरैः (धनिकैः) श्रेष्ठः भवति ।
- गुणयुक्तः दरिद्रः कीदृशैः ईश्वरैः श्रेष्ठः भवति ? — गुणयुक्तः दरिद्रः अगुणैः ईश्वरैः श्रेष्ठः भवति ।

गुणेष्वेव हि कर्तव्यः प्रयत्नः पुरुषैः सदा ।
गुणयुक्तो दरिद्रोऽपि नेश्वरैरगुणैः समः ॥

# तात्पर्यम्

निश्चयेन मानवैः नित्यं गुणेषु प्रयासः करणीयः ।

गुणैयुक्तः निर्धनः अपि गुणैः हीनैः धनिकैः समः न भवति

अर्थात् गुणवान् निर्धनः निर्गुणधनिकात् श्रेष्ठः भवति ।

गुणेष्वेव हि कर्तव्यः प्रयत्नः पुरुषैः सदा ।
गुणयुक्तो दरिद्रोऽपि नेश्वरैरगुणैः समः ।।

# हिन्द्यर्थः

निश्चित ही मनुष्यों को सदा गुणों में (अर्थात् गुण प्राप्त हेतु) ही प्रयत्न करना चाहिए । गुणयुक्त निर्धन भी गुणों से हीन धनिकों के बराबर नहीं होता । अर्थात् गुणवान् निर्धन निर्गुण धनिक से श्रेष्ठ होता है ।

गुणेष्वेव हि कर्तव्यः प्रयत्नः पुरुषैः सदा ।
गुणयुक्तो दरिद्रोऽपि नेश्वरैरगुणैः समः ॥

# आङ्ग्लाभिप्रायः

**People should strive always to maintain good character. Characterless rich man does not compare with poor man of noble character.**

आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना छायेव मैत्री खलसज्जनानाम् ॥

आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना छायेव मैत्री खलसज्जनानाम् ।।

# पदच्छेद:

आरम्भगुर्वी, क्षयिणी, क्रमेण, लघ्वी, पुरा, वृद्धिमती, च, पश्चात्,

दिनस्य, पूर्वार्द्ध-परार्द्ध-भिन्ना, छाया, इव, मैत्री, खलसज्जनानाम् ।

आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना छायेव मैत्री खलसज्जनानाम् ॥

# अन्वयः

आरम्भगुर्वी क्रमेण क्षयिणी, पुरा लघ्वी पश्चात् च वृद्धिमती,

खलसज्जनानां मैत्री दिनस्य पूर्वार्द्धपरार्द्धभिन्ना छाया इव ।

आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना छायेव मैत्री खलसज्जनानाम् ॥

**पदपरिचयः पदार्थाः च -**

| | | | |
|---|---|---|---|
| आरम्भगुर्वी | ('आरम्भगुर्वी' ईकारा. स्त्री. प्र.वि.एक.) | = | आरम्भकाले सुविस्तृता |
| क्रमेण | ('क्रम' अकारा. पुं. तृ.वि. एक.) | = | क्रमशः |
| क्षयिणी | ('क्षयिणी' ईकारा. स्त्री. प्र.वि. एक.) | = | क्षीणा |
| पुरा | (अव्ययपदम्) | = | आदौ |
| लघ्वी | ('लघ्वी' ईकारा. स्त्री. प्र.वि. एक.) | = | अत्यल्पा |
| पश्चात् | (अव्ययपदम्) | = | अनन्तरम् |
| च | (अव्ययपदम्) | = | और(हि.)/And(आं.) |
| वृद्धिमती | ('वृद्धिमती' ईकारा. स्त्री. प्र.वि. एक.) | = | वृद्धियुक्ता |
| खलसज्जनानाम् | ('खलसज्जन' अकारा. पुं. ष.वि. बहु.) | = | दुर्जनानां सज्जनानां च |
| मैत्री | ('मैत्री' ईकारा. स्त्री. प्र.वि. एक) | = | मित्रता |
| दिनस्य | ('दिन' अकारा. नपुं. ष.वि. एक.) | = | दिवसस्य |
| पूर्वार्द्धपरार्द्धभिन्ना | ('पूर्वार्द्धपरार्द्धभिन्ना' आकारा. स्त्री. प्र.वि. एक.) | = | प्रातःकालिकी अपराह्नकालिकी च |
| छायेव | (छाया+इव 'छाया' आकारा. स्त्री. प्र.वि. एक.) | = | छाया |
| इव | (अव्ययपदम्) | = | समाना |

आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना छायेव मैत्री खलसज्जनानाम् ॥

## भावावबोधनम् -

............भवति

- का भवति ? — मैत्री भवति ।
- मैत्री का इव भवति ? — मैत्री छाया इव भवति ।
- मैत्री कीदृशी छाया इव भवति ? — मैत्री पूर्वार्द्धपरार्द्धभिन्ना छाया इव भवति ।
- मैत्री कस्य पूर्वार्द्धपरार्द्धभिन्ना छाया इव भवति ? — मैत्री दिनस्य पूर्वार्द्धपरार्द्धभिन्ना छाया इव भवति ।
- केषां मैत्री दिनस्य पूर्वार्द्धपरार्द्धभिन्ना छाया इव भवति ?
  खलसज्जनानां मैत्री दिनस्य पूर्वार्द्धपरार्द्धभिन्ना छाया इव भवति ।
- दिनस्य पूर्वार्द्धस्य छाया कीदृशी भवति ?
  दिनस्य पूर्वार्द्धस्य छाया प्रारम्भे दीर्घा (आरम्भगुर्वी) भवति ।
- दिनस्य पूर्वार्द्धस्य छाया पुनः कीदृशी भवति ?
  दिनस्य पूर्वार्द्धस्य छाया पुनः नश्यमाणा (क्षयिणी) भवति ।

आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात्।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना छायेव मैत्री खलसज्जनानाम्॥

## भावावबोधनम् -

- दिनस्य पूर्वार्द्धस्य छाया **कथं** नश्यमाणा (क्षयिणी) भवति ?
  दिनस्य पूर्वार्द्धस्य छाया इव **क्रमेण** नश्यमाणा (क्षयिणी) भवति।
- दिनस्य पूर्वार्द्धस्य छाया इव **का** भवति ?
  दिनस्य पूर्वार्द्धस्य छाया इव **मैत्री** भवति।
- **केषां** मैत्री दिनस्य पूर्वार्द्धस्य छाया इव भवति ?
  **खलानां** मैत्री दिनस्य पूर्वार्द्धस्य छाया इव भवति। या आरम्भे सुदृढा भवति परन्तु अनन्तरं क्रमेण नष्टा भवति।
- दिनस्य अपराह्नस्य छाया पुरा **कीदृशी** भवति ?
  दिनस्य अपराह्नस्य छाया पुरा **अत्यल्पा (लघ्वी)** भवति।

आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना छायेव मैत्री खलसज्जनानाम् ॥

## भावावबोधनम् -

- दिनस्य अपराह्णस्य छाया पश्चात् कीदृशी भवति ?
  दिनस्य अपराह्णस्य छाया पश्चात् वर्धमाना (वृद्धिमती) भवति ।
- दिनस्य अपराह्णस्य छाया पश्चात् कथं वर्धमाना भवति ?
  दिनस्य अपराह्णस्य छाया इव क्रमेण वर्धमाना भवति ।
- दिनस्य अपराह्णस्य छाया इव का भवति ?
  दिनस्य अपराह्णस्य छाया इव मैत्री भवति ।
- केषां मैत्री दिनस्य अपराह्णस्य छाया इव भवति ?
  सज्जनानां मैत्री दिनस्य अपराह्णस्य छाया इव भवति ।
  (एषा आरम्भे अत्यल्पा भवति परन्तु अनन्तरं क्रमेण सुदृढा भवति ।)

आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना छायेव मैत्री खलसज्जनानाम् ॥

# तात्पर्यम्

दुर्जनानां मैत्री पूर्वाह्नस्य छाया इव भवति । या आरम्भे सुविस्तृता भवति परन्तु शीघ्रमेव तस्याः क्षयोऽपि भवति । परन्तु सज्जनानां मैत्री अपराह्नस्य छाया इव भवति । या आरम्भे अत्यल्पा अनन्तरं च क्रमेण वर्धमाना भवति ।

आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात्।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना छायेव मैत्री खलसज्जनानाम्॥

# हिन्द्यर्थः

दुर्जनों की मित्रता पूर्वाह्न की छाया के समान होती है। जो आरम्भ में बहुत विस्तृत होती परन्तु शीघ्र ही घटने लगती है। जबकि सज्जनों की मित्रता अपराह्न की छाया के समान होती है। जो आरम्भ में छोटी और बाद में क्रमशः बढ़ने वाली होती है।

आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना छायेव मैत्री खलसज्जनानाम् ॥

# आङ्ग्लाभिप्रायः

**Friendship of bad-people is like the shadow of the forenoon. It is long (and big) in the beginning and gets smaller (shorter) with time. Whereas friendship of good-people is like the shadow of the afternoon; short (and small) in the beginning and grows long (and strong) with time.**

यत्रापि कुत्रापि गता भवेयुर्हंसा महीमण्डलमण्डनाय ।

हानिस्तु तेषां हि सरोवराणां येषां मरालैः सह विप्रयोगः ॥

यत्रापि कुत्रापि गता भवेयुर्हंसा महीमण्डलमण्डनाय ।
हानिस्तु तेषां हि सरोवराणां येषां मरालैः सह विप्रयोगः ॥

# पदच्छेदः

यत्र, अपि, कुत्र, अपि, गताः, भवेयुः, हंसाः,
महीमण्डलमण्डनाय, हानिः, तु, तेषाम्, हि,
सरोवराणाम्, येषाम्, मरालैः, सह, विप्रयोगः ।

यत्रापि कुत्रापि गता भवेयुर्हंसा महीमण्डलमण्डनाय।
हानिस्तु तेषां हि सरोवराणां येषां मरालैः सह विप्रयोगः ।।

# अन्वयः

महीमण्डलमण्डनाय यत्रापि कुत्रापि हंसाः गताः भवेयुः,

हि तेषां सरोवराणां तु हानिः येषां मरालैः सह विप्रयोगः ।

यत्रापि कुत्रापि गता भवेयुर्हंसा महीमण्डलमण्डनाय।
हानिस्तु तेषां हि सरोवराणां येषां मरालैः सह विप्रयोगः॥

## पदपरिचयः पदार्थाः च -

| | | | |
|---|---|---|---|
| महीमण्डलमण्डनाय | ('महीमण्डलमण्डन' अकारा. नपुं. च.वि. एक.) | = | पृथिव्याः शोभार्थम् |
| यत्र | (अव्ययपदम्) | = | यस्मिन् स्थाने |
| कुत्र | (अव्ययपदम्) | = | कस्मिन् स्थाने |
| अपि | (अव्ययपदम्) | = | भी (हिन्द्यर्थः) |
| हंसाः | ('हंस' अकारा. पुं. प्र.वि. बहु.) | = | पक्षिविशेषः |
| गताः | ('गम्' धातुः 'क्त' प्रत्ययः अकारा. पुं. प्र.वि. बहु.) | = | गतवन्तः |
| भवेयुः | ('भू' धातुः वि.लि. प्र.पु. बहु.) | = | स्युः |

यत्रापि कुत्रापि गता भवेयुर्हंसा महीमण्डलमण्डनाय।
हानिस्तु तेषां हि सरोवराणां येषां मरालैः सह विप्रयोगः॥

## पदपरिचयः पदार्थाः च -

| | | | |
|---|---|---|---|
| हि | (निश्चयार्थबोधकम् अव्ययपदम्) | = | एव |
| तेषाम् | ('तद्' दकारा. सर्व. पुं. ष.वि. बहु.) | अर्थात् | तडागानाम् |
| सरोवराणाम् | ('सरोवर' अकारा. पुं. ष.वि. बहु.) | = | तडागानाम् |
| तु | (बलबोधात्मकम् अव्ययपदम्) | | |
| हानिः | ('हानि' इकारा. स्त्री. प्र.वि. एक.) | = | नाशः क्षयः वा |
| येषाम् | ('यद्' दकारा. सर्व. पुं. ष.वि. बहु.) | अर्थात् | सरोवराणाम् |
| मरालैः | ('मराल' अकारा. पुं. तृ.वि. बहु.) | = | हंसैः |
| सह | (अव्ययपदम्) | = | साकम् |
| विप्रयोगः | ('विप्रयोग' अकारा. पुं. प्र.वि. एक.) | = | वियोगः |

यत्रापि कुत्रापि गता भवेयुर्हंसा महीमण्डलमण्डनाय।
हानिस्तु तेषां हि सरोवराणां येषां मरालैः सह विप्रयोगः॥

## भावावबोधनम् -

भवेयुः अर्थात् स्युः

- के भवेयुः ? — हंसाः भवेयुः।
- हंसाः कीदृशाः भवेयुः ? — हंसाः गताः भवेयुः।
- हंसाः कुत्र गताः भवेयुः ? — हंसाः यत्र कुत्रापि गताः भवेयुः।
- हंसाः किमर्थं यत्र कुत्रापि गताः भवेयुः ?
  हंसाः महीमण्डलमण्डनाय (भूम्याः शोभां वर्धयितुं) यत्र कुत्रापि गताः भवेयुः।
- हंसानां महीमण्डलमण्डनाय यत्र कुत्रापि गमनेन किं भवति ?
  हंसानां महीमण्डलमण्डनाय यत्र कुत्रापि गमनेन हानिः भवति।
- हंसानां महीमण्डलमण्डनाय यत्र कुत्रापि गमनेन केषां हानिः भवति ?
  हंसानां महीमण्डलमण्डनाय यत्र कुत्रापि गमनेन सरोवराणां हानिः भवति।

यत्रापि कुत्रापि गता भवेयुर्हंसा महीमण्डलमण्डनाय।
हानिस्तु तेषां हि सरोवराणां येषां मरालैः सह विप्रयोगः ॥

## भावावबोधनम् -

- हंसानां महीमण्डलमण्डनाय यत्र कुत्रापि गमनेन केषां सरोवराणां हानिः भवति ?
  हंसानां महीमण्डलमण्डनाय यत्र कुत्रापि गमनेन तेषां सरोवराणां हानिः भवति, येषां वियोगः भवति ।
- हंसानां महीमण्डलमण्डनाय यत्र कुत्रापि गमनेन तेषां सरोवराणां कैः सह वियोगः भवति ?
  हंसानां महीमण्डलमण्डनाय यत्र कुत्रापि गमनेन तेषां सरोवराणां मरालैः (हंसैः) सह वियोगः भवति ।
- हंसानां महीमण्डलमण्डनाय यत्र कुत्रापि गमनेन किं भवति ?
  हंसानां महीमण्डलमण्डनाय यत्र कुत्रापि गमनेन वियोगः भवति ।
- हंसानां महीमण्डलमण्डनाय यत्र कुत्रापि गमनेन कयोः वियोगः भवति ?
  हंसानां महीमण्डलमण्डनाय यत्र कुत्रापि गमनेन हंस-सरोवरयोः वियोगः भवति ।
- हंस-सरोवरयोः वियोगेन सरोवराः कीदृशाः भवति ?
  हंस-सरोवरयोः वियोगेन सरोवराः सौन्दर्यशून्याः भवन्ति ।

यत्रापि कुत्रापि गता भवेयुर्हंसा महीमण्डलमण्डनाय ।
हानिस्तु तेषां हि सरोवराणां येषां मरालैः सह विप्रयोगः ॥

# तात्पर्यम्

पृथिव्याः शोभार्थं हंसाः यत्र कुत्रापि गच्छन्तु । निश्चयेन हानिः तु तेषां सरोवराणां भवति येषां वियोगः हंसैः सह भवति । ते सरोवराः हंसविहीनाः भवन्ति इति अभिप्रायः ।

यत्रापि कुत्रापि गता भवेयुर्हंसा महीमण्डलमण्डनाय।
हानिस्तु तेषां हि सरोवराणां येषां मरालैः सह विप्रयोगः ॥

# हिन्द्यर्थः

पृथ्वी को सुशोभित करने के लिए हंस जहाँ कहीं भी जाएँ, निश्चय ही उन सरोवरों की तो हानि ही है जिन्हें हंस छोड़ कर चले जाते हैं। अर्थात् जिन सरोवरों से हंसों का वियोग हो जाता है, उन सरोवरों का सौन्दर्य नष्ट हो जाता है।

यत्रापि कुत्रापि गता भवेयुर्हंसा महीमण्डलमण्डनाय।
हानिस्तु तेषां हि सरोवराणां येषां मरालैः सह विप्रयोगः॥

# आङ्ग्लाभिप्रायः

**Let the Swans (Hamsas) go to any other or which ever part of the world, to beautify that place. But loss is surely to the pond, which they takes leave of. (The pond looks beautiful with the swans swimming around. When they leave, the pond looses its beauty)**

गुणा गुणज्ञेषु गुणा भवन्ति ते निर्गुणं प्राप्य भवन्ति दोषाः।

आस्वाद्यतोयाः प्रवहन्ति नद्यः समुद्रमासाद्यभवन्त्यपेयाः ॥

गुणा गुणज्ञेषु गुणा भवन्ति ते निर्गुणं प्राप्य भवन्ति दोषाः।
आस्वाद्यतोयाः प्रवहन्ति नद्यः समुद्रमासाद्यभवन्त्यपेयाः ॥

# पदच्छेदः

गुणाः, गुणज्ञेषु, गुणाः, भवन्ति, ते, निर्गुणम्, प्राप्य,
भवन्ति, दोषाः, आस्वाद्यतोयाः, प्रवहन्ति, नद्यः,
समुद्रम्, आसाद्य, भवन्ति, अपेयाः ।

गुणा गुणज्ञेषु गुणा भवन्ति ते निर्गुणं प्राप्य भवन्ति दोषाः।
आस्वाद्यतोयाः प्रवहन्ति नद्यः समुद्रमासाद्यभवन्त्यपेयाः ॥

# अन्वयः

गुणज्ञेषु गुणाः गुणाः भवन्ति ते निर्गुणं प्राप्य दोषाः भवन्ति। आस्वाद्यतोयाः नद्यः प्रवहन्ति। समुद्रम् आसाद्य अपेयाः भवन्ति।

> गुणा गुणज्ञेषु गुणा भवन्ति ते निर्गुणं प्राप्य भवन्ति दोषाः।
> आस्वाद्यतोयाः प्रवहन्ति नद्यः समुद्रमासाद्यभवन्त्यपेयाः ॥

## पदपरिचयः पदार्थाः च -

| | | | |
|---|---|---|---|
| गुणाः | ('गुण' अकारा. पुं. प्र.वि. बहु.) | = | धर्मः / स्वभावः |
| गुणज्ञेषु | ('गुणज्ञ' अकारा. पुं. स.वि. बहु.) | = | गुणयुक्त-जनेषु |
| भवन्ति | ('भू' धातुः लट्ल. प्र.पु. बहु.) | = | वर्तन्ते |
| ते | ('तद्' दकारा. सर्व. पुं. प्र.वि. बहु.) | | अर्थात् (ते) गुणाः |
| निर्गुणम् | ('निर्' उपसर्गः 'गुण' अकारा. पुं. द्वि.वि. एक.) | = | गुणहीनं जनम् |
| प्राप्य | ('प्र' उपसर्गः 'आप्' धातुः 'ल्यप्' प्रत्ययः) | = | लब्ध्वा अथवा मिलित्वा |
| दोषाः | ('दोष' अकारा. पुं. प्र.वि. बहु.) | = | दुर्गुणाः |
| आस्वाद्यतोयाः | ('आस्वाद्यतोया' आकारा. स्त्री. प्र.वि. बहु.) | = | स्वादिष्ट-जल-युक्ताः |
| नद्यः | ('नदी' ईकारा. स्त्री. प्र.वि. बहु.) | = | सरितः |
| प्रवहन्ति | ('प्र' उपसर्गः 'वह्' धातुः लट्ल. प्र.पु. बहु.) | = | प्रवाहिताः भवन्ति |
| समुद्रम् | ('समुद्र' अकारा. पुं. द्वि.वि. एक.) | = | जलधिम् अथवा सागरम् |
| आसाद्य | ('आङ्' उपसर्गः 'सद्' धातुः 'णिच्-ल्यप्' प्रत्ययौ) | = | प्राप्य |
| अपेयाः | (न पेयाः इति विग्रहः 'अपेया' आकारा. स्त्री. प्र.वि. बहु.) | = | पातुम् अयोग्याः |

गुणा गुणज्ञेषु गुणा भवन्ति ते निर्गुणं प्राप्य भवन्ति दोषाः।
आस्वाद्यतोयाः प्रवहन्ति नद्यः समुद्रमासाद्यभवन्त्यपेयाः ॥

## भावावबोधनम् –

वहन्ति अर्थात् प्रवाहिताः भवन्ति

- काः वहन्ति ? — नद्यः वहन्ति ।
- कीदृश्यः नद्यः वहन्ति ? — आस्वाद्यतोयाः (मधुरजलयुक्ताः) नद्यः प्रवहन्ति ।
- नद्यः कदा पर्यन्तं पातुं योग्य-जलयुक्ताः भवन्ति ?
  नदीजलं यावत्पर्यन्तं नद्यां प्रवहति तावत्पर्यन्तं नद्यः पातुं योग्य-जलयुक्ताः भवन्ति ।
- नदीजलं कदा अपेयं (पातुम् अयोग्यम्) भवति ?
  नदीजलं यदा समुद्रं प्राप्नोति तदा अपेयं भवति । (पातुं योग्यं नदीजलं यदा समुद्रस्य सम्पर्के आयाति तदा समुद्रः तस्य मधुरत्वं (पानयोग्यतां) नाशयति । अतः तद् जलम् अपेयं भवति ।)
- के भवन्ति ? — गुणाः भवन्ति ।
- गुणाः कीदृशाः भवन्ति ? — गुणाः सद्गुणाः भवन्ति ।
- गुणाः केषु सद्गुणाः भवन्ति ? — गुणाः गुणिजनेषु (गुणज्ञेषु) सद्गुणाः भवन्ति ।
- ये गुणाः गुणज्ञेषु सद्गुणत्वेन भवन्ति, ते के भवन्ति ? — ये गुणाः गुणज्ञेषु सद्गुणत्वेन भवन्ति, ते दोषाः भवन्ति ।
- ये गुणाः गुणज्ञेषु सद्गुणत्वेन भवन्ति, ते कथं दोषाः भवन्ति ।
  ये गुणाः गुणज्ञेषु सद्गुणत्वेन भवन्ति, ते निर्गुणं जनं प्राप्य दोषाः भवन्ति ।

गुणा गुणज्ञेषु गुणा भवन्ति ते निर्गुणं प्राप्य भवन्ति दोषाः।
आस्वाद्यतोयाः प्रवहन्ति नद्यः समुद्रमासाद्यभवन्त्यपेयाः ॥

# तात्पर्यम्

गुणाः गुणिजनेषु सद्गुणाः भवन्ति, परन्तु ते एव गुणाः निर्गुणं जनं प्राप्य दोषाः भवन्ति । यथा नदीनां जलं यावत्पर्यन्तं नदीषु भवति तावत्पर्यन्तं तद् जलं मधुरं पेयं च भवति, परन्तु तदेव जलं यदा समुद्रं प्राप्नोति, तदा तद् जलं पातुं योग्यं न भवति ।

गुणा गुणज्ञेषु गुणा भवन्ति ते निर्गुणं प्राप्य भवन्ति दोषाः।
आस्वाद्यतोयाः प्रवहन्ति नद्यः समुद्रमासाद्यभवन्त्यपेयाः ।।

# हिन्द्यर्थः

गुणी व्यक्तियों में गुण सद्गुण के रूप में रहते हैं, परन्तु वे ही गुण, गुणहीन व्यक्तियों के संसर्ग में दोष के रूप में परिवर्तित हो जाते हैं । जिस प्रकार नदियों में पीने योग्य मधुर जल प्रवाहित होता है, परन्तु वही जल जब समुद्र में मिलता है तो खारा हो जाता है अर्थात् पीने योग्य नहीं रहता ।

गुणा गुणज्ञेषु गुणा भवन्ति ते निर्गुणं प्राप्य भवन्ति दोषाः।
आस्वाद्यतोयाः प्रवहन्ति नद्यः समुद्रमासाद्यभवन्त्यपेयाः ॥

# आङ्ग्लाभिप्रायः

**The water of the river remains worthy of drinking till it flows in the land (keeps the friendship of land, implies good company). When it reaches the sea (implies bad company), the same water turns sour and loses its quality of drinkability. Similarly, qualities of human being remains good in good company and turn bad, in bad company.**

# अनुस्वारसन्धिः

→ पाणिनीयं सूत्रम् – मोऽनुस्वारः

→ यदि किसी पद के अन्त में 'म्' हो तथा उसके बाद कोई व्यंजन आए तो 'म्' का अनुस्वार हो जाता है।

म् + व्यंजन

↓

अनुस्वारः

| | | | | |
|---|---|---|---|---|
| हरिम् | + | वन्दे | = | हरिं वन्दे |
| अहं | + | आगच्छामि | = | अहम् आगच्छामि |
| गोपालम् | + | पृच्छति | = | गोपालं पृच्छति |
| अहं | + | अनुपस्थितः | = | अहम् अनुपस्थितः |
| अत्यधिकं | + | अत्याचारः | = | अत्यधिकम् अत्याचारः |
| केन्द्रं | + | आसीत् | = | केन्द्रम् आसीत् |
| महत्त्वम् | + | वर्धितवन्तः | = | महत्त्वं वर्धितवन्तः |
| सकलम् | + | जगत् | = | सकलं जगत् |

# उपसर्गः Prefix

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
प्रहाराहार-संहार-विहार-परिहारवत् ॥
ह धातुः

प्र + हृ = to strike = आक्रमण करना
आ + हृ = to eat = भोजन करना
सम् + हृ = to kill = मारना
वि + हृ = to walk with pleasure/ to wander = घूमना/फिरना
परि + हृ = to ward off = सुधार करना/ त्याग करना

| | |
|---|---|
| गम् जाना<br>आ + गम् आना<br>उप + गम् पास जाना<br>अनु + गम् पीछे जाना<br>अव + गम् समझना<br>निर् + गम् निकलना<br>सम् + गम् साथ जाना | • उपसर्गों का स्वतंत्र प्रयोग नहीं होता।<br>• उपसर्गः + धातुः अथवा उपसर्गः + पद<br>• सन्धिः आवश्यकः |

प्र परा अप सम्
अनु अव निस् निर्
दुस् दुर् वि आङ्
नि अधि अपि अति
सु उत्
अभि प्रति परि उप

अभ्यासक्रमः
आ, वि, प्रति, उप, अनु, निर्, प्र, अधि, अप, नि, अव

| | | | |
|---|---|---|---|
| 1. | प्र | प्रभवति, प्रकर्षः, प्रयत्नः, प्रतिष्ठा | गंगा हिमालयात् प्रभवति। |
| 2. | परा | पराजयते, पराभवति | सैनिकः शत्रून् पराजयते। |
| 3. | अप | अपहरति, अपकरोति | चौरः धनम् अपहरति। |
| 4. | सम् | संस्करोति, सङ्गच्छते | अध्यापकः छात्रं संस्करोति। |
| 5. | अनु | अनुगच्छति, अनुकरोति | शिष्यः गुरुम् अनुगच्छति। |
| 6. | अव | अवगच्छति, अवतरति | रामः भवन्तम् अवगच्छति। अवजानाति वा। |
| 7. | निर् | निर्गच्छति, निराकरोति | प्राचार्यः कार्यालयात् निर्गच्छति। |

| | | | |
|---|---|---|---|
| 8. | निस् | निष्कारणम्, निस्सरति | सर्प: बिलाद् निस्सरति। |
| 9. | दुस् | दुस्त्याज्य:, दुष्प्रयोजनम् | स्वभावः दुस्त्याज्य: भवति। |
| 10. | दुर् | दुर्बोध्य, दुर्लभ: | अयं गूढविषय: दुर्बोध्यः अस्ति । |
| 11. | वि | विजयते, विहरति | धर्म: सदा विजयते। |
| 12. | आङ् | आकण्ठम्, आजीवनम् | आकण्ठं जलं पीतम्। |
| 13. | नि | निगदति, निपतति | पुत्रः पितरं निगदति। |
| 14. | अधि | अधिराजते, अधिशेते | विद्वान् सर्वत्र अधिराजते। |
| 15. | अपि | अपिदधाति | द्वारपाल: द्वारम् अपिदधाति (पिदधाति)। |
| 16. | अति | अतिवाद:, अत्याचारः | अतिवादो न कर्तव्यः। |
| 17. | सु | सुपुत्रेण, सुशोभते | उद्याने पुष्पाणि सुशोभन्ते। |
| 18. | उत् | उड्डयते, उत्पतित: | पक्षिण: आकाशे उड्डयन्ते। |
| 19. | अभि | अभिगच्छति, अभ्यागत: | अभ्यागत: सर्वैः सदा पूजनीयः। |
| 20. | प्रति | प्रत्युपकारः, प्रत्यवदत् | पिता मातरं प्रत्यवदत्। |
| 21. | परि | परित्यजामि, परिवर्तनम् | अहं दुष्टं परित्यजामि। |
| 22. | उप | उपगच्छति, उपहरति | शिष्यः अध्ययनार्थं गुरुम् उपगच्छति। |

अभ्यासः

| क्रमः | पदम् | उपसर्गः | धातु | क्रियापदम्/संज्ञा |
|---|---|---|---|---|
| १ | निरगच्छन् | निर् | गम् | अगच्छन् |
| २ | प्रत्यवदत् | प्रति | वद् | अवदत् |
| ३ | अन्वकरोत् | अनु | कृ | अकरोत् |
| ४ | प्रसीदामि | प्र | सीद् | सीदामि |
| ५ | उत्तिष्ठतु | उत् | स्था | तिष्ठतु |
| ६ | निस्सरतु | निस् | सर् | सरतु |
| ७ | संवदन्ति | सम् | वद् | वदन्ति |
| ८ | सुशोभावहै | सु | शुभ् | शोभावहै |
| ९ | विशिष्यते | वि | शिष् | शिष्यते |
| १० | अवागच्छत् | अव | गम् | अगच्छत् |
| ११ | उपविशामः | उप | विश् | विशामः |
| १२ | उत्थास्यामः | उत् | स्था | स्थास्यामः |
| १३ | उन्नयनम् | उत् | नी | नयनम् |
| १४ | अपाकुर्वन् | अप | कृ | अकुर्वन् |
| १५ | विजयते | वि | जी | जयते |
| १६ | परितुष्यति | परि | तुष् | तुष्यति |

# अनुवादः

| | |
|---|---|
| 1. | आज मेरा जन्मदिन है। अद्य मम/मे  जन्मदिनम्  अस्ति । |
| 2. | उद्यान में प्रकृति का मनमोहक दृश्य है। उद्याने/वाटिकायां/उपवने प्रकृतेः/प्रकृत्याः मनमोहकं दृश्यम् अस्ति। |
| 3. | कर्ण दुर्योधन का मित्र था। कर्णः दुर्योधनस्य मित्रम् आसीत्। |
| 4. | कल बच्चे भ्रमण करने के लिए वन गए थे।ह्यः बालकाः भ्रमणं कर्तुम्/भ्रमितुं/भ्रमणाय/भ्रमणार्थं  वनम् अगच्छन्। |
| 5. | कृष्ण ने द्वारिका में अपनी नगरी बनाई। कृष्णः द्वारिकायां नीजां नगरीम् अरचयत्। |
| 6. | तुम यहाँ क्यों आए थे ? त्वम् अत्र किमर्थम् आगच्छः ? / भवान्/भवती अत्र किमर्थम् आगच्छत्। त्वम् /भवान्/भवती अत्र किमर्थं आगतवान्/आगतवती |
| 7. | तुम सब क्या चाहते हो? यूयं किं इच्छथ। भवन्तः/भवत्यः किम् इच्छन्ति? |
| 8. | तुम्हें अब खाना खाना चाहिए। त्वम् अधुना/इदानी/सम्प्रति/साम्प्रतं भोजनं खादेः। भवान्/भवती खादेत् |
| 9. | देव सदा उपकार करते है। देवाः सर्वदा उपकारं कुर्वन्ति |
| 10. | नदी के दोनों ओर वृक्ष है। नदीम् उभयतः वृक्षाः/पादपा/महीरुहाः सन्ति। |
| 11. | परिश्रमी छात्र सफलता प्राप्त करते है। परिश्रमिणः छात्राः सफलतां प्राप्नुवन्ति/आप्नुवन्ति/लभन्ते<br>सर्वे भवन्तु सुखिनः बाहुबली बलिन् सुखिन् त्यागिन् भोगिन् पक्षिन् प्राणिन्     लोभी लोभिनौ लोभिनः |
| 12. | महोदय ! क्या में उत्तर बोलुं ? हे महोदय! किम् अहम् उत्तरं वदामि ?/वदानि? |
| 13. | मेरी इस पुस्तक में अनेक चित्र है। मम/मे अस्मिन्/एतस्मिन् पुस्तके अनेकानि चित्राणि सन्ति। |
| 14. | मेरे घर के चारों ओर वृक्ष है । मम/मे गृहं परितः वृक्षाः सन्ति। |
| 15. | मैं अब क्या करुं? अहम् इदानीं/अधुना/साम्प्रतम्/सम्प्रति  किम् करोमि/करवाणि? |
| 16. | मैं विद्यालय में सात विषय पढता हूँ। अहं विद्यालये/पाठशालायां सप्त विषयान् पठामि। |
| 17. | मोहन अब कहाँ जाएगा? मोहनः अधुना कुत्र गमिष्यति? |
| 18. | मोहन की माता का नाम यशोदा था। मोहनस्य मातुः/जनन्याः/अम्बायाः नाम यशोदा आसीत्। |
| 19. | रामायण में राम की कथा वर्णित है। रामायणे रामस्य कथा वर्णिता अस्ति। (वर्ण्+क्त=वर्णित) |
| 20. | वे सब देवालय गए। ते सर्वे देवालयम् अगच्छन् । |
| 21. | शायद आज बारिश हो। कदाचित् अद्य वृष्टिः/वर्षा/प्रवर्षः भवेत् । संभावना/should would/चाहिए/कर्तव्य/उपदेश |
| 22. | श्रीकृष्ण ने गीता का ज्ञान दिया। श्रीकृष्णः गीतायाः ज्ञानं दत्तवान्/अयच्छत्। गीताज्ञानं |
| 23. | संस्कृत मेरा प्रिय विषय है। संस्कृतं मम प्रियः विषयः अस्ति। |
| 24. | हम कल देवालय जाएंगे। वयं श्वः देवालयं/मन्दिरं गमिष्यामः/यास्यामः।  गम्=या गच्छति=याति |
| 25. | हम दोनों कल बाजार जाएंगे। आवां श्वः आपणं/विपणिं गमिष्यावः। |
| 26. | हे छात्र ! अब तुम सब पाठ पढो। हे छात्राः ! अधुना यूयं पाठं पठत ।<br>हे छात्राः ! अधुना भवन्तः/भवत्यः पाठं पठन्तु। |

# अनुवादः

| हिन्दी वाक्य | संस्कृत अनुवाद |
| --- | --- |
| मेरे मित्र ने पुस्तक पढ़ी। | मम मित्रं पुस्तकम् अपठत्। |
| वे लोग घर पर क्या करेंगे। | ते गृहे किं करिष्यन्ति ? |
| यह गाय का दूध पीता है। | सः गोदुग्धं पिबति। |
| हम लोग विद्यालय जाते है। | वयं विद्यालयं गच्छाम:। |
| तुम शीघ्र घर जाओ। | त्वं शीघ्रं गृहं गच्छ। |
| हमें मित्रों की सहायता करनी चाहिये। | वयं मित्राणां सहायतां कुर्याम। |
| विवेक आज घर जायेगा। | विवेकः अद्य गृहं गमिष्यति। |
| सदाचार से विश्वास बढता है। | सदाचारेण विश्वासः वर्धते। |
| हम दोनों ने आज चलचित्र देखा। | आवाम् अद्य चलचित्रम् अपश्याव। |
| हम दोनों कक्षा में अपना पाठ पढ़ेंगे \| | आवां कक्षायां स्वपाठं पठिष्याव:। |
| वह घर गई। | सा गृहम् अगच्छत्। |
| सन्तोष उत्तम सुख है। | संतोषः उत्तमं सुखम् अस्ति। |
| पेड़ से पत्ते गिरते है। | वृक्षात् पत्राणि पतन्ति। |
| मै वाराणसी जाऊंगा। | अहं वाराणासीं गमिष्यामि। |
| मुझे घर जाना चाहिये। | अहं गृहं गच्छेयम्। |
| यह राम की किताब है। | इदं रामस्य पुस्तकम् अस्ति। |
| हम सब पढ़ते हैं। | वयं पठामः। |
| जगन्नाथ मंदिर पुरी में है । | जगन्नाथमन्दिरं पुर्याम् अस्ति । |
| सभी छात्र पत्र लिखेंगे। | सर्वे छात्राः पत्रं लिखिष्यन्ति। |
| मै विद्यालय जाऊंगा। | अहं विद्यालयं गमिष्यामि। |
| प्रयाग में गंगा -यमुना का संगम है \| | प्रयागे गंगायमुनयो: संगम: अस्ति \| |
| हम सब भारत के नागरिक हैं \| | वयं भारतस्य नागरिका: सन्ति \| |
| वाराणसी गंगा के पावन तट पर स्थित है \| | वाराणसी गंगाया: पावनतटे स्थित: अस्ति \| |
| वह गया \| | स: आगच्छत् \| |
| वह किसका घोड़ा है ? | स: कस्य अश्व: अस्ति ? |
| तुम पुस्तक पढ़ो \| | त्वं पुस्तकं पठ \| |
| हम सब भारत के नागरिक हैं \| | वयं भारतस्य नागरिका: सन्ति \| |
| देशभक्त निर्भीक होते हैं \| | देशभक्ता: निर्भीका: भवन्ति \| |
| सिकन्दर कौन था ? | अलक्षेन्द्र: क: आसीत् ? |
| राम स्वभाव से दयालु हैं \| | राम: स्वभावेन दयालु: अस्ति \| |
| वृक्ष से फल गिरते हैं \| | वृक्षात् फलानि पतन्ति \| |
| शिष्य ने गुरु से प्रश्न किया \| | शिष्य: गुरुं प्रश्नम् अपृच्छत् \| |
| मैं प्रतिदिन स्नान करता हूँ \| | अहं प्रतिदिनम् स्नानं कुर्यामि \| |

# अनुवादः

| | |
|---|---|
| मैं कल दिल्ली जाऊँगा \| | अहं श्व: दिल्लीनगरं गमिष्यामि \| |
| प्रयाग में गंगा-यमुना का संगम है \| | प्रयागे गंगायमुनयो: संगम: अस्ति \| |
| वाराणसी की पत्थर की मूर्तियाँ प्रसिद्ध हैं \| | वाराणस्या: प्रस्तरमूर्त्तय: प्रसिद्धा: \| |
| अगणित पर्यटक दूर देशो से वाराणसी आते हैं \| | अगणिता: पर्यटका: सुदूरेभ्य: देशेभ्य: वाराणसी नगरिम् आगच्छन्ति \| |
| यह नगरी विविध कलाओ के लिए प्रसिद्ध हैं \| | इयं नगरी विविधानां कलानां कृते प्रसिद्धा अस्ति \| |
| वे यहा नि:शुल्क विद्या ग्रहण करते हैं \| | ते अत्र नि:शुल्कं विद्यां गृह्णन्ति \| |
| वाराणसी में मरना मंगलमय होता है \| | वाराणस्यां मरणं मंगलमयं भवति \| |
| सूर्य उदित होगा और कमल खिलेंगे \| | सूर्य: उदेष्यति कमलानि च हसिष्यन्ति \| |
| रात बीतेगी और सवेरा होगा \| | रात्रि: गमिष्यति, भविष्यति सुप्रभातम् \| |
| कुँआ सोचता है कि हैं अत्यन्त नीच हूँ \| | कूप: चिन्तयति नितरां नीचोऽस्मीति \| |
| भिक्षुक प्रत्येक व्यक्ति के सामने दीन वचन मत कहो \| | भिक्षुक! प्रत्येकं प्रति दिन वच: न वद्तु \| |
| हंस नीर- क्षीर विवेक में प्रख्यात हैं \| | हंस: नीर-क्षीर विवेक प्रसिद्ध अस्ति \| |
| सत्य से आत्मशक्ति बढ़ती है \| | सत्येन आत्मशक्ति: वर्धते \| |
| अपवित्रता से दरिद्रता बढ़ती है \| | अशौचेन दारिद्रयं वर्धते\| |
| अभ्यास से निपुणता बढ़ती है\| | अभ्यासेन निपुणता वर्धते \| |
| उदारता से अधिकतर बढ़ते है \| | औदार्येण प्रभुत्वं वर्धते \| |
| उपेक्षा से शत्रुता बढ़ती है \| | उपेक्षया शत्रुता वर्धते\| |
| मानव जीवन को संस्कारित करना ही संस्कृति है \| | मानव जीवनस्य संस्करणाम् एव संस्कृति: अस्ति |
| भारतीय संस्कृति सर्वश्रेष्ठ है \| | भारतीया: संस्कृति: सर्वश्रेष्ठ: अस्ति \| |
| सभी निरोग रहें और कल्याण प्राप्त करें \| | सर्वे संतु निरामया: सर्वे भद्राणि पश्यंतु च \| |
| काम करके ही फल मिलता है \| | कर्म कृत्वा एव फलं प्राप्यति \| |
| हमारे पूर्वज धन्य थे \| | अस्माकं पूर्वजा: धन्या: आसन्\| |
| हम सब एक ही संस्कृति के उपासक हैं\| | वयं सर्वेऽपि एकस्या: संस्कृते: समुपासका: सन्ति \| |
| जन्म भूमि स्वर्ग से भी बड़ी है \| | जन्मभूमि स्वर्गादपि गरीयसी\| |
| विदेश में धन मित्र होता है\| | विदेशेषु धनं मित्रं भवति \| |
| विद्या सब धनों में प्रधान है \| | विद्या सर्व धनं प्रधानम् \| |
| मनुष्य को निर्लोभी होना चाहिये \| | मनुष्य: लोभहीन: भवेत्\| |
| आज मेरे विद्यालय मे उत्सव होगा\| | अद्य मम् विद्यालये उत्सव: भविष्यति \| |
| ताजमहल यमुना किनारे पर स्थित है \| | ताजमहल: यमुना तटे स्थित: अस्ति \| |
| हमे नित्य भ्रमण करना चाहिये \| | वयं नित्यं भ्रमेम \| |
| गाय का दूध गुणकारी होता है \| | धेनो: दुग्धं गुणकारी भवति \| |
| जंगल मे मोर नाच रहे हैं \| | वने मयूरा: नृत्यन्ति \| |

# अनुवादः

| | |
|---|---|
| किसी के साथ बुरा कार्य मत करो \| | केनापि सह दुष्कृतं मा कुरु\| |
| सच और मीठा बोलो \| | सत्यं मधुरं च वद \| |